# अर्वाचीन-
# संस्कृतमहाकाव्यविमर्शः

(विंशशताब्दिरचितसंस्कृतमहाकाव्यपञ्चकसमीक्षा)

(प्रथमखण्डः)

सम्पादकः

डॉ० रमाकान्त शुक्लः एम०ए०, पी एच० डी०
साहित्याचार्यः, सांख्ययोगाचार्यः

015;1x:g
N79
24875

प्रकाशिका

देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली–११००५९

देववाणी परिषद्, दिल्ली
स्थापना 1966

# अर्वाचीन-संस्कृतमहाकाव्यविमर्शः

(विंशशताब्दिविरचितसंस्कृतमहाकाव्यपञ्चकसमीक्षा)

(प्रथमखण्डः)


सम्पादकः

डॉ० रमाकान्त शुक्लः एम०ए०, पी एच० डी०

साहित्याचार्यः, सांख्ययोगाचार्यः



प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली–११००५९

# अर्वाचीनसंस्कृतमहाकाव्यविमर्शः

(संस्कृत-समीक्षा)

सम्पादकः डॉ० रमाकान्त शुक्लः

24875

015,1109
N79

सर्वाधिकाराः प्रकाशिकायत्ताः

015,1109
N79

KENDRIYA SANSKRIT VIDYA PEETHAM LIBRARY ★ TIRUPATI.
24875

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९ (भारतम्)

मुद्रकः

इण्डियन प्रिंटिंग प्रेस, ७३, दक्षिणी भोपा रोड,

नयी मण्डी, मुजफ्फरनगर (उ०प्र०)

दूरभाष: ५१८२

संस्करणम् : प्रथमम्, जुलाई १९७९ ई०

प्रतयः : २००

मूल्यम् : पञ्चदशरूप्यकात्मकम् रु० १५–००

Price : Rs. 15–00 Ed. 1979

# विषय-सूची


| लेखः | लेखकः | पृष्ठाङ्कः |
|---|---|---|
| १ सम्पादकीयम् | | ४ |
| २ अर्वाचीनसंस्कृतमहाकाव्यानामितिहास-लेखनस्यावश्यकता | डॉ० रमाकान्त शुक्लः | ५-८ |
| ३ 'क्षत्रपतिचरित'-मीमांसा | डॉ० रामसुरेश पाण्डेयः | ९-१४ |
| ४ 'शिवराज्योदय'-समीक्षा | डॉ० रमेशचन्द्र शुक्लः | १५-३५ |
| ५ 'सीताचरित'–समीक्षणम् | डॉ० कृष्णकान्त शुक्लः | ३६-४७ |
| ६ श्रीस्वामिविवेकानन्दचरितस्य महाकाव्यत्वम् | डॉ० (श्रीमती) शशि तिवारी | ४८-५२ |
| ७ 'दयानन्द-दिग्विजय'-वैशिष्ट्य-विवेचनम् | श्रीमती शशि कुमार | ५३-५७ |

# प्रास्ताविकम्

अर्वाचीनयुगेऽपि संस्कृतकाव्यानां तथैव रचना भवति यथा हि प्राचीनयुगे। कष्टकरमिदं यदर्वाचीनरचनानां पठनपाठनालोचनसंशोधानां तादृशी व्यवस्था न दृश्यते यादृशी अपेक्ष्यते। प्राचीनरचनानां महत्त्वं तु सर्वस्वीकृतमेवास्ति किन्त्वर्वाचीनरचनाभिर्लब्धप्रतिष्ठा विद्वांसोऽपि न पूर्णतया सम्यक्तया वा परिचिता सन्ति। इयं हि संस्कृतजगतो हानिरेवास्ति। दिल्लीस्थ-देववाणी - परिषदा पुरातनसंस्कृतरचनाभिः साकं नव्यानामपि रचनानां प्रचारप्रसारार्थं यथाशक्ति प्रयत्नः क्रियते। अस्यामेव दिशि "अर्वाचीन - संस्कृतमहाकाव्यविमर्श" नामकस्यास्य पुस्तकस्य प्रकाशनं क्रियते। अस्मिन् संकलिताः पञ्च लेखाः (डॉ० रमेश-चन्द्र शुक्ल महाभागानां लेखं व्यतिरिच्य) देववाणी-परिषदः २२–७–१९७८ तारिका-यामायोजिते प्रथमवार्षिकाधिवेशने पठिता आसन्। षण्णामपि लेखानां प्रकाशनं, पूर्वं, परिषदा प्रकाशितस्य त्रैमासिकपत्रस्य 'अर्वाचीनसंस्कृत'स्य प्रथमवर्षीये प्रथमेऽङ्के जातम्। अत्र पुस्तकाकाररूपेणैतेषां पुनः प्रकाशन क्रियते।

काव्यालोचन-क्षेत्रे सन्ति बह्व्यः समीक्षादृष्टयः। एकमपि काव्यमनेकाभि-र्दृष्टिभिः समीक्षितुं शक्यते। अत्र संकलिते लेखषट्के विदुषां याः समीक्षणपद्धतयः सन्ति ताभ्य इतरा अपि पद्धतयः सम्भवाः। वस्तुतः सर्वाङ्गीणसमीक्षणाय विदुषामधिकतराः प्रयत्ना अपेक्षिताः सन्ति। आशासे, अस्यां दिशि संस्कृतस्य मृतभाषात्वं खण्डयतां विदुषां सहयोगो न दुर्लभो भवेत्।

अर्वाचीनसंस्कृतमहाकाव्यविमर्शस्य प्रथमे भागे केवलं पञ्चमहाकाव्या-नामेव चर्चा विहिता। अत्र प्रकाशनव्ययानुरोधिनी विवशतैव हेतुभूता। भविष्यति काले ऽन्येषां महाकाव्यानां चर्चां दधानानामुत्तरभागानामपि प्रकाशनमाशास्यते।

अन्ते चाहं डॉ० रामसुरेश पाण्डेय - डॉ० रमेशचन्द्र शुक्ल - डॉ० कृष्णकान्त शुक्ल - डॉ० शशि तिवारी - श्रीमती शशि कुमार - महाभागानामाभारं स्वीकरोमि यैः स्वकीयैर्लेखैरस्य ग्रन्थस्यास्तित्वं सम्पादितम्।

देववाणी-परिषद्, दिल्ली
९ वाणी विहारः नई दिल्ली-११००५९
१०-७-१९७९ ई०

रमाकान्त शुक्लः
सम्पादकः

२१२८

# ‘छत्रपतिचरित’-मीमांसा

(डॉ० रामसुरेश पाण्डेयः, एम० ए०, पीएच०डी०, व्याकरणाचार्यः)

‘क्षत्रपतिचरितं’ विंश्याः शताब्देरुत्तरस्योत्तमं काव्यमस्ति । काव्यमेतत् सरसा- सायास्य मादकमाधुर्यमास्वाद्य कामपि निर्वृतिमलभत मदीयं मनः । यतोऽहं नास्मि साहित्यमर्मज्ञः समीक्षकश्चातः केवलं स्वकीयां प्रतिक्रियामेव व्यक्तीकरोमि । कर्तास्य डा० उमाशंकरशर्माङ्ग्लालोचनदक्षो मामांग्लभाषामध्यापयद्गोरक्षपुरे सम्प्रति च काशी- विद्यापीठे स्नाकोत्तरकक्षायां पाठयति तामेव भाषाम् । तत्कर्तृकं एकोनविंशतिसर्गा- त्मकं सर्वतोरम्यं वीक्ष्य काव्यमेतत् पुरातनायां स्मृतौ नितान्तनिमग्नं मच्चेतो मां विव- शीचकार तदाद्योपान्तं पठितुं कथञ्चित् समीक्षितुञ्च । मम वन्द्यः शर्ममहाभागः सर्व- थाभिनन्द्यः कृत्यायस्यै । एवंविधा एव जना संस्कृतसेवासफलीकृतजनुषः सन्ति । वयं तु जीविकायै संस्कृतं पठामः पाठयामश्च । अस्माकमागमोऽस्ति जीविकायै केवलमतः स्तुमः शर्ममहाभागमनिशम् । अहो कोऽप्ययं यत्नोऽकारि तेन । काव्यस्य वस्तु क्षत्रपति- शिवाजीमहाभागस्य चरित्रमस्ति । अकथितेऽपि सिध्यति तस्य नायकत्वमत्र । स केवलं काव्यशास्त्रदृशा नास्ति नेता अपितु देशसमाजराष्ट्रार्थं नैजं दायित्वं नितरामनुभूय निर- न्तरं प्रयतमानत्वादपि जननेता भवितुमर्हति । समये समये यद्यप्यनेकेऽभवन् वीरा भा- रतभूमौ परन्तु तेस्वलक्ष्यं निर्णेतुमक्षमाः सन्तोऽतस्तत्साक्षात्कर्तुं नाभूवन् क्षमायामस्याम् । क्षत्रपतिः शिव एव तेष्वन्यतमः कृत्यासीद् यो हि दासतोन्मूलनाय आफलोदयं प्रायतता- त एव पाश्चात्यास्तदनुसर्तारः पौरस्त्याश्च सुकुमारमतयो विद्वान्सस्तं देशोद्धरणसमर्थं- नेतारममन्यमाना लुण्ठकाग्रगण्यमेव मन्वते । एवंविधानां विभ्रान्तानां विपश्चितामिति- हासकृतीः पाठशालासु पाठ्यरूपेण पठन्तो विद्यार्थिनो न जानन्ति शिवस्य याथार्थ्यं, फलतो भवन्ति ते मूढा द्रन्द्रम्यमाणाश्च तेऽन्धैनैव नीयमाना अन्धा इव परियान्ति । का- व्येनानेन शिवस्य वास्तविकं रूपं साक्षात्कारयित्वास्मद्देशीयान् भृशमुपचकारास्य कर्ता कृती । कविरत्र शिवस्य राष्ट्रियनेतृरूपमुपस्थापयितुमसंशयममोघश्रमोऽस्ति । दृढं मन्यन्ते भारतीया यत्क्षत्रपतिः स्वतन्त्रतासेनानी, देशभक्तः, उदारचरितः, उदाराशयः, निर्भयमना, परमवदान्यः, अविकत्थनः, न्यायशीलः, वशीवीरः, गम्भीरश्चासीत् । अतः काव्यशास्त्रापेक्षापूरणायैव तस्य नेतृत्वं कविकल्पनाविजृम्भृतं नाऽपितु वस्तुतः स जन- नेता अतः काव्यनेता भवितुमर्हः । कविना वस्तुस्थितेः [illegible] तच्चरितं वर्णयता । तत्र स सुतरां सफलः । कालिदासादीन् रससिद्धान् कवीनादर्शीकृत्य तेन

015,12:9
N79

KENDRIYA SANSKRIT VIDYAPEETHA LIBRARY
24875
TIRUPATI

नितरां प्रत्यपादि यत्तस्मै न रोचतेऽलंकारभारमन्थरमतिरञ्जनापूरपूरं वस्तुवर्णनम्। याथातथ्यमेव परत्रसम्पिपादयिषया काव्यप्रणयनाय प्रचोदितः स रचयामास क्षत्रपतिचरिताभिधं महाकाव्यमिति प्रकटीभवति नितान्तन्तस्य प्ररोचनां दर्श दर्शम्। दुर्लभाणां गुणानामाकरं शिवचरितमत्रोपस्थाप्य सर्वानसमानात्माभारिणः कृतवान् कविः। मेयं कृतिः पुस्तकालयेषूपसंहृतजीवना स्यादपि तु नरीनृत्यतामियं रसिकरसनासु, भासतामियं सुरभारतीसेवाहेवाकिसहृदयहृदयेषु चेति कामयेऽनारतमहम्।

कथानकस्य चयनं यद्यपि सावधानतया कृतं तथापि ५–९ सर्गेषु अफजलखानाभियानम् १२-१५ सर्गेषु च क्षत्रपतेरागरागमनं नूनमितिहासमनुपातश्चातिशय्य वर्णितमस्ति। अनयोर्वर्णने कविः स्वसंकल्पादर्शयोर्विमुखः प्रतीयते। अदृष्टस्थलानां वर्णनेऽपि तेन कर्तव्यपूर्तिरेवाकारि। षड्ऋतुवर्णनमयस्य षष्ठसर्गस्यौचित्यं स स्वयमेवावगन्तुं नाशकत, प्रायतत यद्यपि यथाशक्ति सहजतामापादयितुम्। केचनैते दोषा अस्य गुणसन्निपाति चन्द्ररश्मिषु लक्ष्म इवाभान्ति। काव्यं मनोज्ञं भावप्रवणं च भवेदिति शर्ममान्यतात्र निश्चप्रचं चरितार्थीकृता दरीदृश्यते। भारतराष्ट्रस्य विविधाः परम्पराः समस्यास्तत्समाधानायाहुतीकृतायुषो नेतारः, नानापरिवेशाः, प्रदेशाश्चात्र चित्रिताः। यत्सत्यं महाकवेः कालिदासाद् बहोः कालात् पश्चात् भारतस्योदात्तं रूपमशेषतया साक्षात्कारयितुं क्षममेतत्काव्यं सचेतसः कस्य मनो नो मोहेत। काव्येऽस्मिन्नूनं सा चेतना वरीवर्ति या वेदवेदांगेष्वितिहासपुराणेषु च प्रतिष्ठितातता सततमुल्लसिता च वाल्मीकिव्यासकालिदासाश्वघोषादिभिः पूर्वसूरिभिस्तदीयरचनासु। यस्याश्चेतनाया उपेक्षा संकटततिन्तनुते, उन्मेषश्च स्वातन्त्र्यं समुन्नतिं च तनोति सेवामृतस्रोतस्विनी समन्ततः संसरति क्षत्रपतिचरिते। निदर्शनार्थमवलोक्यन्तामधस्तनानि पद्यानि :

वाल्मीकेर्भारती भाति स्वच्छन्दविधिवर्तिनी।
यत्परीक्षितवीर्योऽसौ नरोऽपीश्वरतां गतः॥ १/५७

पात्रकालवयोदेशबाधमुल्लंघ्य सस्मितम्।
यौवनश्रीः स्वतन्त्रेव कालिदाससरस्वती॥ १/७५

स्वातन्त्र्यरक्षावृतजीवितेन रत्नप्रसूर्नमनेन धात्री।
आचारदेहो रिपुकर्षितोऽपि श्रेयांसि सूते पुनरार्यधर्मः॥ १८/३०

जयत्वेषाभ्युदयाय लोको वसुन्धरैषा च निरस्तबाधा।
धर्मो जयत्वात्मविवेकवर्त्मा लक्ष्मीधुरं क्षत्रपतिर्विभर्ति॥ १८/११३

जाह्नवी जाह्नवी येयं हिन्दवो हिन्दवोऽथवा।

भारत भारतं वाऽद्य तत्र हेतुः शिवोदयः ॥ १६/५२

वर्णधर्मवचोवृत्तिभेदवत्यपि यद्धृताः ।
शैलादासिन्धु देशेऽस्मिन् एकभावा हि देहिनः ॥ १/३६

विभिन्नधर्मवर्त्मानो विभिन्नाजीववर्तिनः ।
विभिन्नाचारवन्तोऽपि नोद्वेगान परस्परम् ॥ १६/८३

प्राश्किविना प्रभावितस्य भारतीविलासस्य प्रभावः प्रतिपदं परिलक्ष्यते शर्मणि। कालिदासदिशैव स तैजं निवेदनं प्रस्तौति । निभाल्यन्तामत्र कानिचन निदर्शनानि :

नैराश्यमाशया भासा तमो मोहं प्रबोधनैः ।
ये भियो घ्नन्ति शौर्येण त एव विषया गिराम् ॥ १/४

मच्चापलमिदं नूनं पूर्वेषामेव कीर्तये ।
नदानामुपजीव्यानामिव स्रोतो विनिर्मितम् ॥ १/७

शिवः पात्रं वचो ब्राह्मी प्रस्तावो मातृभूत्सवः ।
सर्वमेतत् परं दैवात् सूत्रधारोऽहमीदृशः । १/१६

तरत्पृष्ठे तरंगाणां लब्धरोधः पुनर्यथा ।
अब्धिमानं तृणं वेत्ति तथाहमपि तत्त्ववित् ॥ १/१८

मज्जतोऽगाधतीर्थेऽस्मिन् शितपुण्ये पटोरपि ।
धीवराणां प्रसादाय क्वेमे मम पदोद्यमाः।। १/२२

संस्कृतं मृतभाषां मन्यमानान् पण्डितंमन्यान् मन्वानः कथयति :

विस्मयो यद् बुधम्मन्यास्तत्पदार्थोपजीविनः ।
न त्रपन्ते क्षिपन्तस्तां ब्रह्मविद्यां मृतामिति ॥ १/४३

सुकुमारपदन्यासा सुवर्णभरिताम्बरा ।
शुभलक्ष्मीरिवेष्टार्था देववाणी यशस्विनी ॥ १/४४

अनधीत्य सुरब्राह्मीमनिषेव्य सुरापगाम् ।
इह जन्मजुषा नूनं वञ्चितैवार्यमेदिनी ॥ १/४७

काव्यास्वादाय सहृदयता रसिकता वानिवार्यतोऽपेक्षिता । तां विना भावुकता नैव स्थातुमुत्सहते । विविधविद्याविद्भ्यो न रोचते रसास्वादः। भावमिमं नितान्तबन्धुरविधिना विवृणोत्यधस्तनः श्लोकः :

पदे पदविदः सांख्यान् विकृतौ छान्दसान् गतौ ॥
कविता नर्तकी धत्ते रसज्ञान् सरसे हृदि ॥ १।४६

कवितानर्तक्या हृदये धृतानां भावुकानां कान्तासम्मितोपदेशेन देशकालादि-ज्ञानाय कवीन्द्राः स्वकृतिषु तत्तद्विषयाणां परिस्थितीनाञ्च चित्रणं मनोज्ञया रीत्या कुर्वते । स्वान्तःसुखायापि प्रणीतं काव्यमनपेक्ष्य देशकालादीन् न भवति भवत्यत्र द्रढीयान् विश्वासः क्षत्रपतिप्रणेतुस्तद्यथा :

वाग्विशेषे कवीन्द्राणामाकृतिर्मुकुरे यथा ।
संस्तुतिर्देशकालादेः स्वयं व्यक्तेव भासते ।। १।४६

कवेर्निवेदने तस्येयं विचिकित्सा दरीदृश्यते यद्व्यासकालिदासादिरससिद्धानां पाण्डित्यप्रदर्शनोत्सुकानां भारविमाघहर्षाणां रचनासु सतीषु सम्प्रति संस्कृते काव्यप्रणयनं किमर्थमिति प्रश्नः पुरतः प्रसह्य प्रस्तुतो भवति । मन्येऽहं यत् संस्कृतसातत्यार्थं तस्याश्च भाषाया अभिव्यञ्जनसामर्थ्यं प्रकटीकर्तुमधुनापि सा काव्यभाषा भवितुं योग्येति निस्सन्दिग्धतया ख्यापयितुमेव कविश्चकार काव्यं निलिम्पवाण्याम् । भाषायामस्यां तस्य बद्धमूलोऽनुरागः सुव्यक्त एवोपरितनेषूद्धरणेषु अपि च भारतस्य रिक्थं देववाण्यामेव संरक्षितमतो भावाभिव्यञ्जनक्षमायामस्यां सामर्थ्ये सति काव्य-प्रणयनं स्वाभाविकमेवास्ति शर्मसदृशाणां कृतीनां कृते । अथ विचार्यतामत्राधुनिककवेः काव्यप्रणयनप्रयोजनम् । तासु तासु रम्यासु रचनासु सतीष्वपि किमर्थं प्रणीयतेऽधुनात-नेन जनेन काव्यम् ? यदुद्देश्यमासीत् पूर्वेषां कविवराणां तदेवोद्देश्यं स्यादाधुनिकस्य कवेरिति को विप्रतिपन्नो भवेदत्र । पूर्वसूरिभिः स्वदायित्वबोधोऽभिव्यक्तीकृतः प्रकटीकृता च तैः स्वबहुज्ञता । आधुनिकोऽपि कविरात्मनिरूपणं कुर्यादितीच्छति साम्प्र-तिकः समाजः । भवन्तु नामाधुनातनानां काव्यानि क्रान्तदर्शिणां पुरातनानां कवीनां कृतीनां तुलनायै नालम् । कालिदासविधाः कवयो न भवन्ति सर्वत्र सदा च, न चाभूवन्न च भविष्यन्ति तथापि काले काले काव्यानि बभूवुः, भवन्ति, भविष्यन्त्यपि । कविकर्म-दक्षाः कृतिनः स्वदायित्वबोधवशात् परिस्थितिभिः प्रचोद्यमानाः काव्यान्यकुर्वन्कुर्वन्ति करिष्यन्ति च । यत्सत्यं यथा राकाविभावरी पूर्णामृतांशुमण्डिताऽपि तारागणानप्यपेक्षते चारुतरा भवितुं तथैव कविताकामिनी कालिदासादिरचनालंकृताऽपि कामयतेऽनारत-मन्यानि केयूरनूपुरायमाणानि नूतनानि काव्यानि । अनर्घमपि नूतनं महार्घमपि पुरात-नमतिशयितुं क्षमते कदाचित् । अपि च स्वकीयं दायित्वमतीते आधाय तोषो न श्रेयस्करो नोचितश्च । भास्वरमतीतमुपश्लोकयन्नागतञ्चापलपन् न शोभते सुधी । चेत्साहित्यकाराः कुण्ठाग्रस्ता न स्युः स्वबोधपरत्रसंक्रान्तये दायित्वमनुभवेयुः कुर्युश्चा-नारतं रचनास्तन्माध्यमेन राष्ट्रचेतनामनिशमुद्बोधयेयुश्च, देशोऽसंशयं सततं स्वतन्त्रः

सुसमृद्धः सर्वेभ्यो देशेभ्योऽधिकश्च मध्यमभूमिप इव भवितुं समर्थः स्यात्। डॉ० शर्ममहाभागेनानेन नितरां निर्व्यूढं तद्दायित्वम्। विंश्यां शताब्द्यां रचितानां काव्यानां पंक्तौ विभ्राजमानमेतत्काव्यं क्षत्रपतिं दिलीपरघुरामादिवत् चित्रयति। चक्रवर्ती सन्नपि दिलीपो घोषवृद्धान् मार्गशाखिनां नामानि पृच्छन् तैः सह यथात्मीयतां स्थापयति स्म तथैव शिवोऽपि सर्वैः सह जात्यादिनिमित्तनिर्व्यपेक्षां स्वीयतां प्रकटयांबभूव। आंचलिकराजसत्ताऽपि साहित्यसर्जनां भृशं प्रभावयामास। यत्परिणामात् काव्यं व्याप्नोदर्थवादः। दिष्ट्या क्षत्रपतिचरितमस्माद्दोषान्निर्मुक्तकल्पमस्ति। रामकृष्णयुधिष्ठिरादिव्याजेन प्राकृतजनमुपश्लोकयन्तो ग्रन्थेष्वधीतिनो वर्तमानाः कवयः नैजानुभवं विनैव परोक्षसूचनाभिरेवात्मानं तोषयन्तोऽरचयन् काव्यानि। अतस्तत्र मनो न रमते कथञ्चित्। क्षत्रपतिचरितन्तु समुचितवस्तुनेतारसमयत्वात् रोचतेतमां रसिकेभ्यः। महाकाव्यलक्षणमत्र न घटेत्, आनुषंगिकविषयाणां वर्णनेषु कविः कृतकृत्यो न भवेत् इति सम्भवेत् परन्तु क्षत्रपतिचरितवर्णने सः सुतरां सफलोऽस्ति। एवं वाल्मीकिकालिकासादिभिः समादृतो धर्म आदर्शश्च पूर्णतोऽत्रानुपालितो वर्तते। काव्यस्यास्य संरचनां विमृशन् सहृदयो जनोऽतीव प्रसीदति यतः सदसद्व्यक्तिहेतुरेव काव्यास्वादाधिकारी। प्रथमे सर्गे कविरात्मनिवेदनं कृत्वा द्वितीये भारतभूमेर्वर्णनं कृतवान्। घटनानां प्रदेशानां च चित्रणं सावधानतया कृतम्। मालवीयतिलकनेहरूगान्धीप्रभृतीनामत्र मनोज्ञः समन्वयो वर्तते। सर्गान्ते चरित्र-नायकस्यावतारः उपस्थापितः। राष्ट्रियचेतनाया विभुत्वमत्र दर्शं दर्शं मनो लभते कामपि निर्वृतिम् :

शैलेश्वरो यस्य शिरः समुन्नतं गाम्भीर्यमम्भोधिरनन्तरत्नभूः।
दाक्षिण्यपुण्योपचितैव सन्ततिस्तत् कीर्त्यते देशकरेणु भारतम् ॥१॥
मुक्त्वा दिवं यत्र क्षरिद्दिवौकसामात्मावतारैः भगवानपि स्वयम्।
आदर्शसिद्ध्यै विबुधाश्च सन्ततं सम्बन्धमेव प्रथयन्ति संगताः ॥२॥
वर्णेषु धर्मेषु वचस्स्वनेकधा भिन्नाः स्वभावानुगुणोपलब्धयः।
देशे जना ओषधयो यथा वने नित्यैक्यभावाः सुखदुःखयोरपि ॥४॥
यावत् स्वदेशः स्मरति द्वयं सदा शैलाधिपं हैमवतीञ्च वाहिनीम्।
पङ्केऽयमुग्रे पतितोऽपि दुस्तरे बीजं ययोरेष्यति साहसांकुरैः ॥१७॥
विस्मापयन् कोऽपि धियं सुमेधसां छिन्नोत्तमांगोऽपि सुखेन जीवतु।
स्वप्नेऽपि किं प्राणितुमार्यभूरियं काश्मीरवर्जं क्षमते मनस्विनी ॥३२॥
यावत्तनौ भारतभूमिजन्मनामेकोऽपि कीलालकणोऽवशिष्यते।

आसिन्धुशैलात् प्रकृतिः प्रणन्दतु सीम्नि स्थिरा तावदपेतसंशया ॥३॥

भारतस्य सर्वतोरम्यता, भारतीयानां प्राणेभ्योऽपि गरीयः स्वदेशप्रेम, भारत-भूमेरखण्डता, अत्रत्यजनतैकता चोपरितनेषु पद्येषु निशम्य कस्य सचेतसो भारतीयस्य मनसि राष्ट्रियता नोदेत् । काव्यनेतुः शिवस्य जन्मवर्णनमपि राष्ट्रप्रेम द्रढयति निकामम् ।

आदर्शयाथार्थ्यविदात्मनन्दिनी सा देवमायेव चरित्रदेवता ।
तं रत्नसूनं सुषुवे प्रजाभरं यत्तेजसाद्यापि वयं वयं युगे ॥ २/१८

देशोऽयं गाम्भीर्येऽम्भोधिकल्पः, समुन्नतौ प्रालेयाचलोपमः, पावनतायाममर-सरिन्निभः, तरुलतासस्यसौभाग्यलक्ष्मीं श्रयता ऋतुसमाजेन समन्वितत्वादृतुराजसख-सन्निभश्च ।

—०००—

# 'शिवराज्योदय-'समीक्षा

(डॉ० रमेशचन्द्र शुक्लः, एम०ए०, पीएच० डी०, साहित्याचार्यः,
सांख्ययोगाचार्यः)

अनेहसि वर्तमाने प्रणीतानि त्वभूवन् बहूनि महाकाव्यानि परं तेषु 'श्रीशिवराज्योदयं' नाम महाकाव्यं, यन्महाकविना डॉ० श्रीधरभास्करवर्णेकरेण विरचितं, परमाभिरामं सौन्दर्य्यं बिभ्रदद्भुतमेव सहृदयहृदयावर्जनपटीयस्कत्वं परिपुष्णन् महाकाव्यरहस्यविन्मतमहाकाव्यत्वश्रिया समुद्दीप्यमानं परमानन्दप्रदमधुरमधुरतरोपस्कारैर्विद्योत्यमानं महाकाव्यानां जगति संशोभते। 'इदमाविर्भवति नः पुरस्ताद् वर्णेकराणामूर्जस्वलं, स्फूर्तिस्फारं, विक्रमैकरसं संस्कृतजीवनं शिवप्रभोश्च पावनजीवनगायनं श्रीशिवराज्योदयं नाम नवावतारं महाकाव्यम्' इत्येतदिदं महाकाव्यमधिकृत्य श्रीविद्वद्वर ग० वा० पलसुलेमहाभागस्य कथितं वचः सर्वथैव सत्यम्।

महाकाव्यस्यास्य प्रथमे सर्गे वयं सह्याद्रेर्निसर्गरमणीयतामीक्षामहे। सह्यगिरेः सुषमा षड्भिरपि ऋतुभिः परिष्वज्यमानादावुपस्थिता सञ्जायते। मधौ पर्वतस्य पुष्पितव्रततिजालकावृतत्वं पुष्पविल्वदलपुञ्जपूजितत्वञ्च स्थाणुलिङ्गशतमालिकाशोभमभिव्यनक्ति। प्रावृषि पर्वततटीस्खलन्नदीनां सलिलप्रवाहस्य महान् ध्वनिः शिखावलानामवलिम्प्रति मेघगर्जितभ्रममुत्पादयति। यो हि महीधरः शारदीमैन्दवीं कलां दधच्चन्द्रशेखर इवाभाति, दुःसहनिसर्गतेजोऽभिभूतं रिपुकुलं यस्य सानुमतो हैमनमपि पवनं कवोष्णं कुरुते, दाहसमयवर्तिनं तं शिलोच्चयं कविर्वर्णयतीत्थम् :

ज्योतिषा परिविकीर्णरोचिषा यत्र दाहसमयेषु संहृतम्।
विप्रतापभयलज्जया ध्रुवं दाहताधिकमधित्यकास्वपि ॥

महाकवेर्वर्णनवैदग्ध्यं काव्यानुशीलननिहितमानसानां मानवानां पुरोऽष्टसिद्धिविभवं विनायकमवतारयति येन ते (मानवाः) भवन्ति पावना धन्याश्च। एतावदेव न, यदीयेषु सरित्तटादिषु दक्षिणाभिमुखस्य वीरमारुतेर्दर्शनं महाकाव्यस्यास्याध्येतारं सफलजीवनं विदधाति, अथ च यत्र विदधाति तम् अध्येतारं पाण्डुरङ्गः प्रभुर्विगततापत्रयम्। महाराष्ट्रस्याधिदैविकतां कीर्तयन् कविर्वर्णेकरः पण्ढरपुरपेशलतामालिखन् ज्ञानेश्वरमुपवीणयति, ततश्च सः योगशक्तिं गायन्, वीरतामुपश्लोकयन्, कलासौन्दर्यं संस्तुवन्, धर्मराज्यं निरूपयन्, म्लेच्छशासनापत्तिमापादयन्, परित्राणाय भक्त्या भगवन्तं स्तवीति च

पाहि पाहि भगवन् जनानिमान् म्लेच्छराज्यपरिपीडितानिति ।
प्रार्थयंश्चिरमुदश्रुलोचनाः साधवः क्वचन भग्नमन्दिरे ॥

इत्येतदादिश्लोकैः ।

द्वितीयः सर्गः साधुतुकारामस्य महात्मनो रामदासस्य च दर्शनं कारयित्वा महाकाव्यस्यास्य पठकं पाठकञ्च कृतार्थीकरोति । श्रीवर्णेकरस्तयोः सतोरध्यात्म-ज्ञानदीपकत्वमाकलयन् महाराष्ट्रे तयोराविर्भावं रूपकेणोपमया च प्रस्तवीति :

महाराष्ट्रमहाम्भोधौ तयोरुज्ज्वलतेजसोः ।
सहसोत्थानमभवत् चन्द्रकौस्तुभयोरिव ॥ २/२

सतस्तुकारामस्य वाणी आर्षवाणीव पूजिता बभूव । तस्य वाणी आसीत् सारवती स्वानुभूत्येकसारा च । अतः कवितेव सा सर्वेषामपि स्वान्तमचूचुरत् । कवि-रनेकैः श्लोकैस्तदीयं गहनीयत्वमहसोज्ज्वलं साधुत्वं समुपस्थापयति । स विरोधा-भासेन तं सन्तं कियत्सुन्दरतया वर्णयति :

अब्राह्मणोऽपि ब्रह्मज्ञो निर्द्वन्द्वो द्वन्द्ववानपि ।
यो मोहकोऽपि निर्मोही विग्रही चाप्यविग्रहः ॥ २/११

अहो, कियच्चमत्कारचारुतां वर्षन्ती कवेर्लेखनीश्चेतः परिप्रीणयति :

मञ्जुलोन्नादिनीं श्रुत्वा यद्वीणामैकतान्तवीम् ।
चातुर्मास्येऽपि वैकुण्ठे निद्राभङ्गोऽभवद्धरेः ॥ १/१४

यदीयहरिकीर्तने वचोब्रह्म अनृत्यदित्येतत् कविरुत्प्रेक्षायामामनति—

हृदयंगमभावार्द्रं दिव्यभक्तिरसप्लुतम् ।
वचोब्रह्म ननर्त्तेव यदीयहरिकीर्तने ॥ २/२१

महात्मनो रामदासस्य तेजस्वितां कर्मयोगपरायणतां भगवद्भक्तिपरतां राष्ट्र-रक्षणक्षमशक्तिशालिताञ्च अन्यांश्च तदीयान् बहून् गुणान् वर्तमानस्य कालस्यायमनुपमो महान् कविः श्लोकैः :

यद्रूपेण महौजस्कः क्षात्रभावः परन्तपः ।
प्राप्तुं भूयस्तपः शक्तिं ब्राह्मीं मूर्तिमिवाश्रितः ॥ २/२६

इत्यादिभिरनेकैरुपश्लोकयति ।

'रामदास' इत्येतन्नाम्ना प्रथितोऽसौ महान् आत्मा निरन्तरं जयं कुर्वाणः सविग्रहो जपयज्ञ इव प्रत्यलक्ष्यत—

गोदावरी सरिन्नीरे यो निमग्नार्धविग्रहः ।

२२८



जपमग्नो जनैर्मेने जपयज्ञः सविग्रहः ।। २/३०

दण्डमुद्यम्य सः सर्वान् धर्मरिपून् तर्जयन्निवादृश्यत :

ब्रह्मचर्यव्रतप्राप्तं दण्डमुद्यम्य पैप्पलम् ।
तर्जयन्निव निर्भीकः सर्वान् धर्मरिपून् सदा ।। २/३६

अर्थस्तदीयां वाचमन्वधावत् :

आशीर्वचनसंयुक्तां यदीयां सहसोदिताम् ।
ब्रह्मवर्चस्विनीं पुण्यां वाचमर्थोऽनुधावितः ।। २/४१

महातेजाः स जटाश्मश्र्वादिभि र्जङ्गमो यज्ञाग्निरिव प्रत्यभासत । अत उच्यते :

श्मश्रुलेन जटालेन स्वाननेन च यो बभौ ।
धूमावृतो महातेजा यज्ञाग्निरिव जङ्गमः ।। २/४४

व्यतिरेकेणोपमया च वर्ण्यं वस्तु कियद् बन्धुरं विधाय कविना प्रस्तुतीकृतम् । कमपि मानवलोकबन्धु मीक्षितु मखिलो लोक आतुरोऽभवदित्येतेन प्रस्तुतेन कविरप्रस्तुतं शिवोदयमपेक्षमाणः सर्गमुपसंहरति ।

तृतीयस्मिन् सर्गे वसन्तसुषमामादौ प्रदर्श्य कविमूर्धन्यः शहाजि-जिजयोः परिणयशुभमायोजयितुं जाधवरावगृहे वसन्तोत्सवं सुहृद्बन्धुसमागमञ्च निबध्नाति । नवदम्पत्योः संस्तवं निदधाति कविराभ्यां श्लोकाभ्याम् :

सूर्यान्वयो भोंसलनामकोऽसौ चन्द्रान्वयो यादवसंज्ञकश्च ।
सन्मण्डपे सेतुनिभेऽत्र यातां पूर्वापरौ तोयनिधीव योगम् ।।३/६६
चन्द्रान्वयस्योज्जवलवैजयन्ती जिजा विशेषोच्छ्वसितं मदीयम् ।
भवत्वसौ भोसलवंशहर्म्ये चिराय मङ्गल्ययशःपताका ।।३/६७

सर्गोऽयं प्रमोदेन परिहासेन शिवशैलूषदृश्येण च मनः प्रमोदयन्

यस्योद्घायविवर्तनै र्जलनिधेरुच्चैः समुत्क्षेपिताः
मुक्ताच्छा जलबिन्दवः समभवन् भास्वत्प्रभास्तारकाः ।
यः शङ्खासुरनाशितश्रुतिसमुद्धाराय बद्धव्रतः
श्रीविष्णोः प्रथमावतार इह वः कुर्यात् सदा मङ्गलम् ।।३/७०

इत्येतदाद्यष्टश्लोकात्मकमङ्गलपाठं विधायोपसंहृतो भवति ।

चतुर्थे सर्गे कवि र्जिजायाः पतिसदनगमनं तस्या अन्तर्वत्नीत्वं तद्दोहदं निदाघं च वर्णयित्वा शिवाजे र्लोकमङ्गलविधायकं जन्म तस्य चारितेजोऽभिभावि तेजश्चोद्गीय सकलसुजनसमुदायं नन्दयति :

सकलसज्जनमानसवर्तिनी परममङ्गलवाञ्छितवल्लरी ।
शुभतमेऽहनि नवार्भकजन्मना सुफलिता शिवनेरि-महालये ॥४/५२
नवशिशोरतिभास्वरतेजसा न गृहमात्रगता लघुदीपिकाः ।
प्रतिहता यवनाधिपमस्तकस्थितकिरीटमहामणिभा अपि ॥४/५३

पञ्चमे शिशुतां नयन्तं शिवाजि, तं हृदयहारिणीं बाललीलां कुर्वन्तमादौ पश्यामो वयं, तस्मिन्नेव बाल्ये बालस्य शिवाजेर्वीररसैकसक्तताञ्च प्रेक्षामहे । शिवाजिरल्पीयसैवानेहसा बभूव स्पृहणीयेन बलेन विभूषितः :

दण्डप्रहारच्छुरिकाविभेद–कृपाणविच्छेदन–शूलघातैः ।
स वञ्चिकाचर्मनिरोधयुक्तैः गुरूपदेशै रभवद् बलाढ्यः ॥५/२३

शिवाजिः प्रत्यहं शैशव एव स्वमातृमुखाद् रामायणीया भारतीयाः पवित्राः कथाः अश्रौषीत् । वीरोत्तमानां चरितामृतमन्वहं तमपाययन्माता । अतः सा स्ववत्सस्य धर्मगुरुर्बभूव :

श्रीरामकृष्णार्जुनभीममुख्यवीरोत्तमानां चरितामृतस्य ।
प्रबोधयन्ती परमं रहस्यं माताभवद्धर्मगुरुः शिवस्य ॥५/२९

माता तदीया :

गोमातरं भूतलदेवतां तां त्रायस्व सेवस्व भजस्व भक्त्या ।
पूर्णावतारे स्वयमीश्वरेण स्वकर्मणाऽऽदिष्ट इवैष धर्मः ॥५/३१
वेदोक्तशुद्धाचरणैकवित्तान् सतत्त्वसंचिन्तनमग्नचित्तान् ।
भूदेवतान् जङ्गमशास्त्रबोधान् त्रायस्व विप्रान् स्वभुजाश्रयेण ॥५/३२
रामासु रामानुजवत् परासु मातृत्वबुद्धिं सततं दधीथाः ।
पराङ्गना यस्य मता स्वमाता स राजयोगी स च योगिराजः ॥५/३३

इत्येतदादिभिरुपदेशैस्तमुपदिदेश ।

"मातुरुपदेशैः शिवाजि र्बभूव दृढसंस्कृतात्मा सदाचारपरायणश्च । स बाल्यादेव अतः जनताया आदरपात्रं बभूव" इत्येतद् वर्णयन् कविः सर्गमिमं पञ्चमं संवृणोति ।

पुत्रस्य शिवाजे र्विनयवीरतादि सद्गुणाः पितर मतितरामप्रीणयन् सः परां प्रीतिं गच्छन् स्वात्मजं यवनराजसन्निधौ तं नेतुमैच्छत् परं जिजां न भर्तुः स विचारोऽतूतुषत् । सा भारतीयनारीसमुचितसमुदाचारं परिपालयन्ती प्रोवाच :

"वन्दते दयित ! वन्दनोचितान् दैवतान् तव ममापि यः पदे ।
सज्जनांश्च भगवत्परायणान् म्लेच्छराजपुरतः स किं नमेत्" ॥६/१२

बालभास्करमिवोदयोन्मुखं बालमप्यमुमिमे महौजसः।
आनमन्ति शिवदर्शनं शिवं दृष्टमात्रमतिभक्तितो जनाः ॥६/१३
किं न पश्यसि मुखेन्दुमण्डले पाणिपादकमले च गोचरम्।
जन्मसिद्धमिव पुत्रकस्य ते छत्रपत्युचितलक्ष्मजालकम् ॥६/१४

शिवाजिमातुर्वचो निशम्य शहाजिः (शिवाजेः पिता) चिन्तामापेदे । परं क्षणेनैव शिवाजिर्मातरं पितरं स्वविनयाचारेण पर्यतोषयत्। कविरेत् सर्वं निगद्य राजधान्या वर्णनं करोति, दर्शयति च विजापुरगमने बालशिवस्यौत्सुक्यम्। षष्ठःसर्गोऽयं पितृवात्सल्यविषयकं भारतीयपतिव्रताया आचारं परं, सत्पुत्रनिष्ठञ्च चारुतरं चित्रमस्मत्पुरतो निदधाति ।

सप्तमं सर्गं शिवं सभाजयन्तं राजधान्यामादौ वयमीक्षामहे । लताप्रसूनैरलिगुञ्जनैश्च शिवं सभाजयाञ्चक्रुः; मयूरा एतं कुमारकल्पं कुमारं वीक्ष्य आनन्दमत्ता भूत्वा मधुराभिः केकाभिस्तं प्रत्युद्जग्मुः। शीतमन्दसुगन्धसमीरस्तं सेवितुमारभत। उत्प्रेक्षामुपमाञ्चाश्रित्य कविरेतत् सभाजनं सम्यग् वर्णयित्वा सह्याद्रिश्रियं दृष्टेः पुरः समुपस्थापयति। सः सह्यगिरिस्तरुणां चलत्पलाशाङ्गुलिभिः खगानां कलकूजनैश्च तं शिवमाह्वयन्निव प्रातीयत । ततश्च वनफलादिकमास्वादयन् पितृकृतराजसेवोपदेशं शृण्वन्, म्लेच्छराजसभायां प्रविशन् शिवः प्रेक्षितो भवति। अस्ति शिवोहिन्दुत्वाभिमानविभ्राजितः। स्वदेशस्य गौरवं तस्य रोमणि रोमणि राजते, अतः सः सर्वत्र तत्र अनवनतमस्तको विलोक्यते। राजसभायां शिवाजेः परिचयः प्रदत्तो भवति किं वा सः स्वयं स्वपरिचयं प्रददाति— "अनम्रशीर्षोनृपमाह बालः शिवाजिरेषोऽस्मि शहाजिसूनुः" ७/४०। राजपथे सः शिवाजि गोघातकं दण्डयति; जनतां तस्य तत्कार्यमानन्दयति :

जय जय जय जीवोज्जीव जीवेतिलोकैः
प्रविकसितमनोभिः कण्ठशंखावकीर्णाम्।
विनयविनतमूर्घ्ना गर्जवर्षा दधानः
प्रथममनुबभूव (?) स स्वमूर्धाभिषेकम् ॥७/५४

अत्र भङ्ग्या शिवाजेर्जनताधिपत्वं श्लोकस्य पदावलिरभिव्यनक्ति । तस्मिञ्छिवे धेनो र्वात्सल्यं :

श्रीकृष्णदिव्यवपुषः शिवबालकस्य
स्वप्राणरक्षणचणस्य वपुर्लिहन्ती।
वात्सल्यमाविरकरोदथवा प्रसादं

सा गौरगौरपि सुगौरव मात्मसंस्थम् ॥७/५५

इत्येतेन श्लोकेन कविः शिवस्य समस्तभूरक्षणक्षमशक्तिमत्वं व्यञ्जनयाभिव्यक्तीकुर्वन् सर्गमिमं समाप्तिं नयति ।

जनता भवेद् गोरक्षणपरायणा; सा पारतन्त्र्ये जुगुप्सेत, तत् पारतन्त्र्यं ध्वंसयितुं सततं प्रयस्येत् तथा यथा तस्योन्मूलनं स्यात् । सा (जनता) स्वतन्त्रतायां जीवेत्; पारतन्त्र्यप्रसनजीवनं तां व्यथयेत् इत्येतदुदग्रभावनां जनताया हृदये सन्निवेशयितुं कविना महाकाव्यमिदं प्रणीतमस्ति । कविरितो महाकाव्यं स्वकीय तदुद्देश्योन्मुखं विधातुमुपक्रमणं कुर्वाणो दृग्गोचरो भवति । कवेः काव्यस्याष्टमः सर्गस्तदेवोद्देश्योन्मुखत्वं दर्शयति ।

श्रीशिवाजिः स्वातन्त्र्यमधिगन्तुं प्रत्याश्रृणोति । तदर्थमुपयुक्तसाधनानि संग्रहीतुं यतते । कोहि स जनो योऽष्टमं सर्गमधीत्य पारतन्त्र्यपरिपन्थी न सञ्जायते । कोहि स जनो यः :

किं जीवितेन विभवेन सुखेन तेन
किं भारभूतकरवालधनुःकृपाणैः ।
किं पौतषेण यदि न प्रभवामि पातुं
गो-देव-वेद-वनिता-द्विजसाधुसंघान् ॥८/२९

इत्येतदादीनि शिवाजेर्वचांसि निशम्य न भवति साहसोत्साहौजःस्फूर्तिशक्तिसमन्वितो भवति च न दुराचारद्विट्पारतन्त्र्योत्सादनप्रतिज्ञः । नवमसर्गे :

"स्वातन्त्र्यसंगरदीक्षितास्त्वच्चरणशरणागताः ।
वयमविचलनिश्चया हर हर हर महादेव" ॥९/२८

इत्येतदादिकान् हर हर हर महादेवध्वनिकारकान् सप्तदश श्लोकान् पठित्वा को न पठकः पाठकश्च अनन्तोत्साहसम्पन्नो भूत्वा, दुराचारध्वंसनपरायणोभूत्वा, पारतन्त्र्याराति र्भूत्वा भगवच्चरणावलम्बनवलयुक्ताश्च भूत्वा उच्चैः 'हर हर महादेव' इति समुच्चारयन् सकलमपि गगनं गुञ्जितं कुरुते ।

श्रीरोहिडेशं भक्तया परितोष्य प्रदक्षिणीकृत्य च मन्दिरं शिवाजेः सैनिकाः समाहिता भूत्वा सन्तिष्ठमानाः सञ्चरन्तश्च दशमेन सर्गेण प्रदश्यन्ते । शिवाजिर्मातुश्चरणौ संस्पृश्य तां जयाशिषं याचमानोऽत्र दृग्गोचरो भवति :

स मन्दमन्दं जननीमुवाच जानीहि मातः सफलां निजेच्छाम् ।
अद्यप्रभृत्येव समारभेऽह मभूतपूर्वां चिरजैत्रयात्राम् ॥१०/१४

अद्यप्रभृत्येव निजप्रतिज्ञासाफल्यमापादयितुं यतेय ।
जयैषिणो मे विजयैकहेतुः प्रदीयतां माङ्गलिको वरस्ते ॥१०/१८

अत्र दशमे जयाय निश्चयोद्घोषणा शिवाजेः श्रुता भवति; सर्वत्रिकः प्रहर्षः श्रूयते, म्लेच्छाधिपभवनानि मलिनानि च दृश्यन्ते । तोरणदुर्गसंस्कारः, सुवर्णलक्ष्मीलाभः, नूतनराजमुद्राप्रवर्तनं, स्वातन्त्र्यदिनोदयश्रीश्च काव्यस्यास्याध्येतारं भृशं प्रीणयन्ति । वस्तुतोमहाकाव्यमेतत् तांस्तानुच्चतमान् भावान् विकिरति यैः काचिज्जातिः, कोऽपि देशः कापि संस्कृतिः कश्चन आचारः पावनो जीवनं लभन्ते । नूनं महाकाव्येनानेन भारतीयताया रक्षणाय, हिन्दुमन्दिराणां सत्तायाः सम्प्रतिष्ठापनाय, श्रुति-शास्त्र-पुराण-दैवतादीनां महिम्न आर्याणां गृहे गृहे अतितरां समुद्भासनाय जनुर्गृहीतमस्ति । एतादृशस्य महाकाव्यस्य यावान् प्रचारः स्यात् तावानेव भारतस्य प्रकाशः समुद्दीपितो भवेत् ।

महान् पुरुषः सिंह इव भवति स्वपौरुषार्जितक्षितिक्षितिपतित्वः । तन्मनसि द्रढीयान् सङ्कल्पो जार्गति । तदीयं नैतिकं बलं भवति अनन्तम् । चरित्रं च भवति परमपावनमुन्नततरञ्च । अतः सहस्रशो लक्षशोजनाः स्वयमेव तदनुगामिनो जायन्ते । तस्य वीरस्य पुरः समग्रापि जनता भवति प्रणतमस्तका । विजयश्रीस्तं मानवमहीयांसं स्वयमेव वृणुते । वयं कृत्स्नतयैव शिवाजौ महापुरुषत्वं पश्यामः । स उपश्लोकनीय-चरित उदात्तस्वभावो मानवत्वाराधको भगवति भक्तिं निदधौ, ब्राह्मणेषु गुरुजनेषु गवि चादरधियं सः पर्यपुष्णात् । सोऽन्यायं निहन्तुमनैतिकतां विनाशयितुं, पापपूर्णानि च कार्याणि ध्वंसयितुं युयुधे । स तत्र समतिष्ठत यत्र सत्यमशोभत, स तत्रावर्तत यत्र सदाचारो व्यद्योतत, स तत्र अदृश्यत यत्र धर्मो व्यराजत । अस्मादेव हेतोर्यदा स विजय-यात्रां कर्तुमारमत तदा सर्वत्रैव स विजयमवाप्नोत् । कथं न स विजयं लभेत ? सः गुरोः कृपायाः पात्रमासीत् । गुरुस्तं स्वशुभाशीर्भिः समवर्धयत अतस्तस्य जीवनं विजयश्रिया दीप्यमानं भवद् विबभौ । महाकाव्यस्यास्यैकादशः सर्गः श्रीशिवाजेः पुरुष-श्रेष्ठत्वं प्रदर्शयन् ज्ञापयति यत् शिवाजिः कार्याकार्यविवेकार्थं विश्वतोमुखीं प्रतिभां न्यदधात् :

मनुष्याणां सहस्रेषु क्वचिदेवावलोक्यते ।
कार्याकार्यविवेकार्थं प्रतिभाविश्वतोमुखी ॥११/२४

सर्गोऽयं युद्धवीराणां कृते स्वर्गद्वारमपावृतं भवतीत्येतद् गीतोक्तं वचनं स्मारयति :

"युद्धमुक्तं भगवता स्वर्गद्वारमपावृतम्" ११/२७

अस्मद्देशस्य वासिनां योगिनां समवायम्प्रति यो हि दीक्षामन्त्रः प्रदीयते सर्गेणानेन सोऽयम्—

योगिभिश्चापि कालेऽस्मिन् युद्धयोगेन साध्यताम्।
आत्ममुक्तिं तिरस्कृत्य राष्ट्रमुक्तिर्महीयसी ॥११/२९

पारतन्त्र्यभयङ्करे काले संन्यास्यपि दण्डनीतिमवलम्बेत इत्येतच्च महाकाव्यमिदमुपदिशति :

संन्यासिनापि कालेऽस्मिन् पारतन्त्र्यभयङ्करे।
निरस्य पैप्पलं दण्डं दण्डनीतिरवलम्ब्यताम् (?)॥११/३०

नूनं शिवाजिकृष्णो हिन्दुभूयमुनां, या म्लेच्छकालियनागेन दूषितां, सर्वथैव अनेनेक्। महान् विद्वान् कविर्वर्णेकर इत्येतत् सत्यमाकलयन् काव्यादस्माद् राष्ट्रभक्ति-शिक्षां प्रददाति। बोधयति च तद् "धीरैस्तथा प्रयतितव्यं यथा शत्रुरनुक्षणं दूयेत न सः कदापि सुखेन शयति। विपत्स्वपि न धीराः कर्त्तव्यपथात् स्रंसन्ते ते विपदः सहमानाः सधैर्य्यं सहर्षञ्च स्वगन्तव्यपथं संश्रयन्तः शत्रून्संहरन्ति इत्येतत् सर्वं द्वादशस्त्र-योदशश्च सर्गः प्रतिमानयतः। आर्जवं कुटिलेषु न नीतिः; मायिनं तु मायया जयेत् इत्येतन्मनसि निधाय शिवाजिः स्वपितृविमोचनाय प्रायस्यत्। जगदम्बाया अनुग्रहं विना न कार्यं सिद्ध्यतीत्येतच्च विमृश्य शिवाजेर्जननी जगदम्बामानर्च। एतद्विधै-रुपायैः क्षिप्रमेव शिवाजिः स्वपितरमुन्मुक्तं कर्तुं क्षमो जातः। वस्तुतः स एव पुत्रः पुत्रो यः पितुर्बन्धनान्मोचयितुं समर्थो भवति। धन्यमिदं काव्यम्। तदकेतस्तु वैदुष्यावदातया भाषयास्मदीयं ज्ञानं वर्धयत्येकतश्च तद्विधं कथावस्तु निधाय अस्मदीयं चरित्रमुन्नमयति तत् पवित्रीकरोति, तद्गतां मलिनतां सर्वामपनीय सर्वथैव तन् नेनेक्ति, संस्करोति सम्मार्ष्टि च। एतौ चतुर्दशस्य सर्गस्य अन्त्यौ श्लोकौ द्वौ कं न मातृपितृभक्तं पुत्रं प्रीणयेताम्—

मुक्तः पितेति च रसंश्रुतकिंवदन्तीं
पीयूषवृष्टिमिव सौख्यकरीं किरन्तम्।
ग्रीष्मावसानपिशुनं नवनीरदाभं
सा चातकीव सुतमैक्षत जीवमूतम् ॥१४/५४
साश्चर्यसम्मदविनिगल दश्रुधारां
विप्रोषितागतशुचिस्मितपूर्णवक्त्राम्।
आलोकयन् स्वजननीं मुमुदे शिवाजिः
मोदेत को न खलु मातृमुदा सुपुत्रः १४/५५

स्वातन्त्र्यासाधनानन्तरं विरचितेषु संस्कृतभाषानिबद्धेषु राष्ट्रियमहाकाव्येषु वा राष्ट्रियमहाकाव्यानां परम्परायां श्रीशिवराज्योदयं नाम महाकाव्यं व्यापक-विस्तृतजीवनदृष्टिहेतोः समर्थाभिव्यक्तिवशाच्च निश्चप्रचतया नैजं विशिष्टं स्थानं गृहणद् विभ्राजते। अत्र तस्य प्रभातस्मरणीयस्य महापुरुषस्य चरित्रं चकास्ति यो भगवद्भक्तौ, मातृ-पितृसेवापरायणतायां, स्वराष्ट्राचारविचारसंस्कृतिसभ्यतानुरागितायां, हिन्दुत्वभारतीयतासंरक्षणे, मानवतोत्कर्षोत्थापनपावनकर्मणि च नितरामनन्यगामाभां निदधत् संशोभते स्म। परदारेषु स मातृधियं न्यदधात् भारतीयताकदनकारिशत्रुनिषूदनकारि शौर्य्यं सः स्वभुजयोरधारयत्, तत् पावनमुदात्तञ्च चरित्रं शाश्वत् तद्गुरुजनानप्रीणयत्। वस्तुतस्तदा भारतं त्रातुं शिव एव शिबाजि भूत्वावततार। नूनं महाकाव्यमेतद् राष्ट्रप्रेम्णः काव्यमयमाकलनं वर्तते। अस्मिन् महाकाव्ये तन्नीते सम्यग् दर्शनं सञ्जायते यां नीतिं रामो बालिनं निग्रहीतुं, कृष्णो जयद्रथं विप्रलब्धुमाललम्बे। कुटिलमारातिम्प्रति यादृशं विवेकाभिवन्दितं-नीति सभाजितं कौशलमभिमतं वर्तते तादृशं कौशलं काव्यस्यास्य श्लोकेषु :

"यावन्न मे गुरुरसौ तव पक्षपाती
कारालयाद् बहिरुपैति विजापुरीयात्
यौष्माकराज्यपरिवर्धनदत्तचित्त
स्तावन्न किञ्चिदपि कर्तुमहं समर्थः" ॥१५/१५

इत्येतदादिषु दृग्गोचरं भवति। अनुचितमुचितञ्च न विचार्य पितुराज्ञायाः पालनं रामायणमिव काव्यमिदमपि शिक्षयति :

कथमपि पितृवाक्यसुप्रतिष्ठा परिरक्षार्थमसावनीहमानः।
स्वविषयकवचास्पदं हि दुर्गं शिवराजः स ददौ पुनर्विजेतुम् १५/५२

दौरात्म्यदलने कवे विचाराः सन्ति सुस्पष्टाः प्रौढतराश्च। अनौचित्यस्य च दमनं कवेः सर्वथैवाभिमतम्। तदीया कृतिरेव भवति तद्विचाराणां दर्पणः। कथावस्तुव्याजेन कविः स्वमनोऽप्रियतां स्व मनः प्रियतां च प्रदर्शयन् प्राप्यते :

दण्डनीयापराधस्य तस्यात्मीयतया शिवः
औद्धत्यं शिशुपालस्य श्रीकृष्णइव चक्षमे ॥१६/३९
स्वतन्त्र्यराजसूयेष्टौ बाधमानमवेक्ष्य तम्।
व्यापादयितुमुत्तस्थौ चमूचक्रधरः शिवः ॥१६/४०

उपमामाश्रित्य कविरत्रैव षोडशे न, सर्वत्रैव प्रायः कथावस्तु अतितरां हृदयपरितोष-

दूरं कृत्वोपन्यस्यति । तदधीत्य निशम्य वा पाठको महाभारत–रामायणयोः श्रवण-पठनविषयकमानन्दं विन्दति । परमवैदग्ध्यपूर्वकं महाकविरयं वृत्तं घटनां विचारञ्चोन्मीलयति । तदीय एव महान् गुणस्तस्य महाकाव्येऽस्मिन् क्व न दृष्टो भवति ?

"वेत्सि हिन्दुवनिता पतिं प्रियं दिव्यदैवतधियाऽर्चयन्ति ताः ।
हन्त किन्तु गृहिणी ममाप्रियं मां विरोद्धुमिव वर्तते सदा ॥१७/४२

इत्येष श्लोकस्त्विह निदर्शनत्वेनोपस्थापितः । वीरः स एव यः स्वकीयमरातिं शङ्कुरिव कुन्तइव शरइव निपीडयेत् । अयं शिवाजिर्यस्य सत्त्वाद् विजापुरनरेशविभातुः प्रकोप-वेदनामयानि वचांसि अफझुल्लस्य च तांस्तानुद्गारान् शृणोति पाठकोऽष्टादशे सर्गे ।

दुष्टाः दुराचारप्रियाः शठाः किं न पापं कर्तुं प्रवर्तन्ते, धैर्यधनाः दुराचार-दलननिपुणशौर्य्यभाजो महान्तोऽकम्पिता भवन्तः स्थिरवृत्तित्वं दर्शयन्तो निजेष्टदेवतायाः प्रसादं प्राप्नुवन्तीत्येतत् सर्वं निगद्य कविः कथयति सन्देशमिमं नेतृत्वं तदेव यत् त्यागेन तपसा च समर्चितं विद्यते । जगदम्बिकायाः शुभाशिषमपि स एव सुकृतिः लभते यो भवपि स्वदेवतैकनिष्ठो धर्मवीरः । शिवाजेरनन्यगां भक्तिं धर्मं वीरताञ्च प्रेक्ष्यैव जगदम्बिकाचकथदिति :

वत्स ! त्वदन्यो जगतीतलेऽस्मिन् न जातु जातो न जनिष्यते वा ।
मदेकनिष्ठः खलुधर्मवीरो यदेकसंस्थं हृदयं मदीयम् १९/४३

ईदृशानि स्थलानि स्फुटतयैव कवेरस्य देवतैकनिष्ठत्वं धर्मवीरतानुरागित्वं संलक्षितं सञ्जायते ।

सत्पथगामी मनस्वी अवश्यमेवाकृत्रिमसौहृदवन्तं पवित्रशीलं सुहृदमश्नुते इत्येष कवेः सुदृढो विश्वासस्तं स विंशं सर्गमारचय्य मन्ये प्रकटीकुरुते । नात्र सन्देहो महाकाव्यमिदं धर्मशास्त्रस्य भूमिकेव भूत्वा विभासते ।

श्रीवर्णेकरः कविकर्मणः सूक्ष्मत्वं तस्य च गरिमाणं समीचीनतयावगच्छति । तस्येदं वैशिष्टयं महाकाव्यस्यास्य आद्याच्छ्लोकादन्त्यं श्लोकं यावद् दृश्यते । न तदर्थ-मिह कस्यचन श्लोकस्य वा स्थलस्य समुपस्थानमपेक्ष्यते । अनीकिन्याः सैनिकानां पङ्क्तयो यथा समानवेशाः समानपदोपन्यासाः समानप्रांशुत्वधरा भूत्वा ओज-समुल्लसितया गत्योपसरन्ति तथैवास्य महाकवेः पदावलिः पुरः उपसरन्ती पाठकानां हृदयं दृष्टिञ्चयार्जयन्ती सर्वत्र परिलक्ष्यते । वीक्ष्यताम् :

बलाढ्यदोर्दण्डयुगस्य तस्य दोर्दण्डयोः काचिदुदग्रशक्तिः ।
मत्तारिविध्वंसपटीयसी सा पुनः कुतश्चित् सहसाऽऽविवेश ॥२१/४०

वक्षःस्थले स्वत्वहृढाभिमानोन्नते स्वधर्मप्रखराभिभानः ।
युक्तस्तयारिप्रतिबोधबुद्ध्या किञ्चिन्नवं ताण्डवितं चकार ॥२१/४१

× × × ×

वीरस्वभावोचितमात्मजस्य माता च तं सम्भ्रममीक्षमाणा ।
अतिप्रसन्ना सहसा जगर्ज जयोऽस्तु ते पुत्र चिरं जयोऽस्ते ॥२१/४६

यादृशः सन्दर्भोभवति तादृशमेव पदसमुच्चयमवतारयति कविः :

कालमेघतमस्काण्डावगुण्ठितनभस्तले ।
खद्योतपुञ्जास्तन्वन्ति रात्रावुडुविडम्बनम् ॥२२/१२
नूनमम्भोधिकल्लोला वेलावप्रनिरोधिताः ।
मेघरूपेणसम्प्राप्ता अभिषेक्तुं वसुन्धराम् ॥२२/१३

कवेः समुचितपदपङ्क्तिसामर्थ्याद् वर्ण्यमानोविषयः साकारोभूत्वा नेत्रयोः समक्षेऽवतरति । कविः स्व विवेकज्योतिषा दोषध्वान्तं क्षिणोति । स गुणानवलम्ब्य कलाकलितरसाभिषिक्तं श्रेष्ठं कथावस्तु आरचय्य लोकनिर्माणदिशायां प्रवृत्तो भवन् प्राप्यते । इदं हि सत्यं यो हि जनस्तस्य महाकाव्यमिदमधीयीत श‍ृणुयाद् वाऽसौ पश्यति । अन्वक्षरं कवेः कुशलं महाकवित्वं चकास्ति । तदीयः पदबन्धो भवति मनोऽभिरामः । यत्र यामेव रीतिमाश्रित्य रचना विधत्ते तत्राश्चर्यंकरं साफल्यं विन्दन् स वीक्ष्यते :

विलोलमञ्जरीपुञ्जनृत्यन्मत्तमधुव्रते ।
मूकभेककुलाक्रन्दे हंसकूजितमञ्जुले २३/३

इत्यादिपद्येषु कीदृशी हृदयहारिणी गौडीरीतिर्विराजते । वैदर्भी रीतिस्तु काव्येऽत्र प्राधान्येन परिस्पन्दते । श्लोकाः सन्तीदृशाः शतशो यत्र विशेषणपदानि भृशं प्रियाणि भूत्वावतिष्ठन्ते । तेषां साभिप्रायत्वात् ते परिकरालङ्कारालङ्कृताः प्राप्यन्ते । अत्रोदाहरणत्वेन श्लोक एकोनिधीयते :

अगणितगुणशालिन् सिंहसामर्थ्यधारिन्
सकलरिपुविदारिन् सूर्यचण्डप्रतापिन् ।
विहतमतिरनेकागस्करो बालकोऽयम्
अभिलषति भवत्तो तात नर्ते क्षमायाः ॥२४/३५

शिवराज्योदयाभिधेया कविता दृश्यते नानालङ्कारालङ्कृता । रसमयी अलङ्कृतपदपेशला हृदयानन्दप्रदा सद्भावपरिपूर्णा सहृदयानुरागरञ्जना गुणमयी सुन्दररचना या भवति सैव कवितेति गीयते इति यत् कविताया लक्षणमभिहितं तत् पूर्णतया शिवराज्योदये

घटते । कवि :

यस्मिन्नेव क्षणे सूर्यः स उदेतुं प्रवर्तते ।
क्षणशः कणशस्तस्मिंस्तमसा हि विशीर्यते ॥२५/२५

इत्यादावप्रस्तुतप्रशंसया कदापि,

श्रीमतां परिचर्यार्थं तत्रायातु नरद्वयम् ।
नैकाकिनो हि श्रीमन्तो यान्ति क्वापि कदाचन ॥२६/२६

इत्यादावर्थान्तरन्यासेन कदापि,

ततः शरच्चन्द्रमरीचिजाललसद्धिमानीधवलं सुवासः ।
कौषेयमत्यन्तमृदुप्रकृत्या दधौ स्वदेहे कवचद्रढिष्ठे ॥२७/३५

इत्यादौ स्वभावोक्त्या कदापि,

मिलन्मिलिन्दानि मरन्दवन्ति मनोज्ञगन्धीनि सरोरुहाणि ।
विचित्रगुच्छाकृतिगुम्फिलानि विलोलयामासुरमुष्य नेत्रे ॥२८/१६

इत्यादौ पर्यायोक्तेन कदापि,

स स्फाटिकान्युज्जवलकान्तिमन्ति मैरेयपात्राण्यतिचित्रितानि ।
विलोक्य तेभ्यः स्पृहयांबभूव तथा न तत्रत्यमधुद्रवेभ्यः ॥२८/२१

इत्यादौ व्यतिरेकेण कदापि,

धर्मो ह्यधर्मेण नयोऽनयेन सुसंयमः क्रोधभरेण किं वा ।
नराकृती राक्षसमूर्तिनेव शिवोऽफभुल्लेन तदावलग्नः ॥२९/२१

इत्यादौ दीपकेन कदापि,

मरणान्तानि वैराणि देहिनामिह संसृतौ ।
हतस्यापि रिपोर्देहे धर्मकृत्यं हि युज्यते ॥३०/८

इत्यादौ काव्यलिङ्गेन कदापि

दहति लुण्ठति मन्थति कृन्तति मृश्नति कूर्दति वृश्चति हन्ति वा ।
अधिपथं यदमुष्य हि दृक्पथं पतति हन्त विजापुरवैभवम् ॥३१/२२

इत्यादौ कारकदीपकेन कदापि,

किमविशन्नगरे हतराक्षसी धृतभयङ्करभीतकलेवरा ।
उत कथञ्चिदकम्पत मेदिनी किमथवाऽऽपतितः पृथुपर्वतः ॥३१/१२

इत्यादौ सन्देहेन कदापि,

लीलोल्लङ्घितसह्याद्रिशिखराणामपि क्षणात् ।

तेषामभूद् दुरुल्लङ्घ्या शिवाज्ञा वाङ्मयार्गला ॥३२/६४

इत्यादौ निदर्शनया कदापि,

न्यषेधि सर्वत्र निशीथिनीषु च प्रदीपिकानां ज्वलनं मनागपि ।
प्रकाशनं तत्र चकार पर्वते प्रदीप्ततेजःस्वरचन्द्रहासम् ॥३३/४६

इत्यादौ परिणामेन कदापीत्थं स्वकवितां सर्वत्र विविधैरलङ्कारैरलङ्कृतां कुर्वाणः सम्प्रेक्ष्यते ।

महाकाव्येऽस्मिन् सत्कर्त्तव्यप्रदर्शिन्यः को नाम धर्मः कश्चाधर्म इति ज्ञापनकारिण्यो रसस्निग्धा हृदय-श्रवण परितोषणक्षमाः शतशः सूक्तयः शोभन्ते । कान्तेव ताः सर्वेषामपि पाठकानां पुरः समुपस्थिताभूत्वा मधुराभिः पदावलीभिः अतितरां मधुरेणप्रकारेण चेतांसि रमयन्ति । अत्र काश्चन उपस्थाप्यन्ते :

"पारतन्त्रमहत्पापं परिध्वंसितुमुद्यतान् ।
करुणा जगदीशस्य त्रायते महतो भयात् ३४/५७
"सुहृद्विपत्तिं स्वविपत्तिमेव प्रायः कुलीना गणयन्ति लोके" ३५/११
"अहो निर्मलशीलस्य पुण्यचारित्र्यशालिनः ।
स्वस्मिन्ननुत्तमां भक्तिं ज्ञात्वा देवोऽपि मुह्यति" ।३६/२८
"आपत्सु भर्तुः खलु सेवकानां रहस्यसंगोपनमेव धर्मः" ।३७/५०
"आत्मानं विजुहूषूणामाहवे राष्ट्रहेतवे ।
अपि सिद्धदशारूढाः कलां नार्हन्ति षोडशीम्" ॥३८/५२
"दया हि धर्मोखिलहिन्दुजातेः अनादिकालाद् भुवने प्रसिद्धः"॥३९|५८
"यथाकालं फलन्त्येव पापानि खलु पाप्मनाम्" ॥४०/२८
"क्षत्रियाणां परो धर्मो ह्यापन्नपरिपालनम् ।
सचेन्न पाल्यते सम्यग् धिगस्तु हतजीवितम्" ।।४१/१५

कविकर्मणः सूक्ष्मं गम्भीरतरं गुरुतरं च ज्ञानं कविर्निदधात्यतस्तदीयेयं रचना रसवती शक्तिमती स्फीतताश्रीसमुद्दीपिता सञ्जातास्ति । यस्य सविधे भवन्ति प्रतिभाः शास्त्राणां ज्ञानम्, लोकानुभवः, गुरुप्राप्तशिक्षानुसारकाव्यनिर्माणाभ्यासस्तस्य काव्यं भवति यशःप्रदम् अर्थप्रदम्, व्यवहारबोधकम्, अनिष्टनाशकम्, परमानन्दकारकम् अथ च कान्तासम्मिततयोपदेशप्रदाननिष्णातम् । महाकवेर्वर्णकरस्य महाकाव्यमिदं वस्तुतो निर्दिष्टगुणालङ्कृतं वर्तते । तस्य कवितायां वर्तते वेगमयः प्रवाहस्ततस्तस्य शब्दार्थयोर्महान् अधिकारः प्रकटीभवति :

प्रत्यग्रदूर्वाभहरिन्मणीनां पलाशपुष्पच्छविविद्रुमाणाम् ।
कर्पूरखण्डद्युतिमौक्तिकानां यत्र प्रभा नेत्रसुखं वितेनुः ॥४२/३
यस्यां विपण्यामनिशं धनाढ्याः सुवर्णवस्त्रोत्तमरत्नभूषाः ।
सवित्तकोषं स्म परिभ्रमन्ति क्रेतुं स्ववाञ्छोचितरत्नजातम् ॥४२/४

कदाचिदनवधानवशाच्छिवसैनिकैः काचन यवनाङ्गना धृता तां ते शिवस्य पुर आनिन्युः । तां वीक्ष्य शिवो यदवोचत् तदुद्गीय कविः स्वदेशवासिनां यूनां चरित्रमुन्नततरं कर्तुं कामयते :

"भवति किन्नु बिभेषि सुतान्निजात् त्वमसि मे जननी खलु धर्मतः ।
प्रथममेतदवेहि मम व्रतं यदखिला महिलाः खलु मातरः" ॥३१/३७

× × ×

"इतिनिगद्य वचः परमादरं स्वकुलरीतिमनुप्रतिपूजिताम् ।
पतिगृहं विससर्ज यवीयसीं बत शिवाजिरमूं यवनाङ्गनाम्" ॥३१/३९

शिवाजिसमये म्लेच्छैर्मन्दिराणि निपातितानि, देवमूर्तयो भग्नतां नीतानि, गावो व्यापादिताः सत्कुलाङ्गना धर्षिताः, वेदग्रन्था दग्धीकृताः, वैदिकद्विजाः निपीडिताः अन्ये च बहवोऽतिनिन्दनीया अत्याचाराः कृताः । कविस्तच्चर्चां विधाय देशस्य युवानोऽपि शिवाजिरिव मन्दिर-देवमूर्त्यादिरक्षकाः स्युरिति अभिलषते :

"मन्दिराणि निपात्यन्ते भज्यन्ते देवमूर्तयः ।
गोमातरो निहन्यन्ते धृष्यन्ते सत्कुलाङ्गनाः ॥
वेदग्रन्थाविदह्यन्ते पीड्यन्ते वैदिकद्विजाः ।
परिलुण्ठितसर्वस्वा निर्वास्यन्ते कृषीवलाः" ॥३४/२२-२३

शिवचरित्रगायनंकुर्वाणः कविः शिवाजिमुखेन मातुर्महिमानं गायति :

"साधीयसी त्वं साधुभ्यो गुरुभ्यश्च गरीयसी ।
अपि स्वर्गाच्च मोक्षाच्च मातस्त्वं श्रेयसी मम ॥४३/३५

एवमेव सः (कविः) देशतरुणाः पितृभक्ता भवेयुस्ते मातृ-पितृसेवायामेव स्वजीवनं सफलं मन्येरन्निति वाञ्छति :

पितृदेवकृपाच्छत्रं यस्य मूर्ध्नि विराजते ।
स हि छत्रपतिर्नूनं नाभिषिक्तो महीपतिः ॥४३/५०
सत्पुत्राणां महाकर्म-परिक्लेशव्यथाभुजाम् ।
मातुः पितुश्च सन्तोषः परमं पारितोषिकम् ॥४३/५१

विदग्धतापूर्णकथनं कवेः सर्वोत्तमा विशिष्टता भवति । अयमेव स गुणो यः सामान्यासामान्यतां कवीनां विभिनत्ति । अयमेव अलोकसामान्यतत्त्वानुभूतेर्वर्तते प्रमुखं साधनम् । कोऽपि सौभाग्यवानेव कविः सरस्वत्याः प्रसादमिमं लभते :

कस्यचिदेव कदाचिद् दयया विषयं सरस्वती विदुषः ।
घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम् ।।(दशरूपकम्, १/३)

एतस्य महाकाव्यस्य प्रणेता वर्णेकर ईदृगेव सौभाग्यभोगभाक् कविः । समग्रेऽपि काव्ये तदीये वैदग्धीभङ्गीभणितिः प्रौढतया विभाति ।

निजगाद च राजासौ कृत्रिमोत्साहतुन्दिलः ।
निरुत्साहहतान् सर्वान् प्रोत्साहयितुमुत्सुकः ।।४४/१४
ब्रूत युष्मासु साम्राज्याधारभूतेषु कः खलु ।
ताम्बूलमिदमादातुं धैर्यशाली समीहते ।।४४/१५
यस्य बाह्वोर्महावीर्यं शिवाजिदमनक्षमम् ।
स्वयमुत्थाय गृह्णातु स ताम्बूलमिदं मम ।।४४/१६

इत्येते श्लोकास्त्विह विदग्धतापूर्णा दिङ्मात्रं दर्शिताः ।

महाकवेर्भाषा तत्र भवति परमौजस्विनी यत्र वीरताया भावाः सन्तिष्ठन्ते :

"रे रे दुर्दास्य नरकाभोगासक्त ! नराधम !
स्वातन्त्र्यशत्रो ! रक्तं ते भवानी मे पिपासति ।।४४/३८

× × × ×

यया च जिह्वया नीच ! भर्त्सितो मे पिता त्वया ।
तामामूलं समुत्पाट्य चिकीर्ष्ये पितृतर्पणम् ।।४४/४
म्लेछराज–पदस्पर्श–लम्पटं तव मस्तकम् ।
विच्छिद्य मातृभूदेव्याः कल्पयामि बलिं खलु ।।४४/४१

× × ×

खवासखान ! मन्ये त्वं मृत्योरसि वशं गतः ।
ससैन्यं यदिहाभ्येतो युयुत्सुः सह्यगह्वरम् ।।४४/५७

कवेः पदबन्धो वर्तते बन्धुरतरः—

सङ्ग्रामनौकाः शतशश्च तस्य महाशतघ्नीशतरौद्ररूपाः ।
काषायवर्णध्वजदर्शनीया विलोक्य भीता हृदि शत्रुसंघाः ।।४५/२६
ता युद्धनौका मकरप्रचण्डाः परिभ्रमन्त्यो मकरालये च ।

स्वराज्यशत्रून् जलचारिणस्तान् जित्वाऽहरन् भूरिधनं समन्तात्।४५/२७

× × × ×

इत्थं दिगन्तेषु सुविश्रुते तम् क्षणे क्षणे च प्रतिवर्धमानम्।
यशः शिवस्योज्ज्वलदीप्तिशालि दिल्लीश्वरं चेतसि निर्ददाह ॥४६/१

राष्ट्रस्य रक्षा न शास्त्राधीना अपितु सा शस्त्राधीनास्ति इत्येतन्निश्चित्य कविना स्वकाव्यस्य नायको वीरवरेण्यः पुरुषसिंह आहृतः। कस्यापि राष्ट्रस्य मानवा युवानश्च वीररसपरिपूर्णस्य चारित्र्यधवलस्य वीरस्य गाथां निशम्य वीरतासमुल्लसितानां कृत्यानां गायकं काव्यमाकर्ण्य अधीत्य च वीराः सच्चरित्राश्च भवितुमर्हन्ति। सच्चरित्रतामयीं शूरतां सेवमाना एव शूरर्षभा स्वकीयस्य राष्ट्रस्य, स्वदीयायाः संस्कृतेर्महिमानं गरिमानं, मानं, सम्मानञ्च वर्धयितुं, परिपोषयितुं पातुञ्च समर्था भवन्ति; अतः कविः श्लाघ्यशौर्यस्य सच्चरित्रताश्रीनिःषेवितस्य शिवाजेस्तच्छौर्यं गायति यत्र शत्रुमर्दनक्षमता शोभते, यत्र कुमार्गगामिदुर्जनदुष्टतामर्दनपटीयस्कता विभाति, यत्र स्वराष्ट्रस्य गौरवे भक्तिर्विराजते, यत्र धर्मत्राणस्य कृतेऽमोघं नीतिज्ञत्वं विभ्राजते, यत्र चादम्य उत्साहः क्रियाविधिज्ञत्वमदीर्घसूत्रत्वं, व्यसनवैमुख्यञ्च राजन्ते, यद् गुणेषु आदरधियं निदधाति, यद् दृढसौहृदसौन्दर्यसंयुतं विद्यते, यच्च भवति कृतज्ञम्। महाकविर्वर्णेकरः सर्वमिदं सम्यग् विभाव्य स्वदेशस्य स्वसमाजस्य, स्वमनीषिणां स्वतरुणानामग्रे शिवराज्योदयं महाकाव्यं समुपस्थापयति। यदा हि महावीरस्य शिवाजेः स्पृहणीयं श्लाघनीयं शौर्यं कोऽपि देशोऽवेक्षते, यदा हि युवानः शिवाजिं तं तं दुर्मार्गगं दुष्टं शत्रुं व्यापादयन्तं पश्यन्ति तदा तेषु अपि तस्यां शूरतायामनुरागो जागर्ति यां शूरतां शिवाजिर्न्यदधात्।

जयोऽस्तु रामस्य रघूत्तमस्य श्रीरामदासस्य गुरोर्जयोऽस्तु।
जयोऽस्तु ते विठ्ठलपाण्डुरङ्ग सदा तुकाराममुनेर्जयोऽस्तु ॥२९/४६
जयोऽस्तु नित्यं शिवशासनस्य हिन्दुस्वराज्यस्य चिरंजयोऽस्तु।
जयोऽस्तु धर्मस्य सनातनस्य जयोऽस्तु राष्ट्रस्य च भारतस्य ॥२९/४७

इत्येतदादिभिः श्लोकैः कविर्महानयं सकलेऽपि भारते सनातनधर्मपताकामुच्चैरुद्धूनयन्, राष्ट्र-प्रेम-प्रवाहं सर्वत्र सञ्चारयन्, हिन्दुत्वभावनां प्राबल्येन प्रगाढीकुर्वन्, स्वातन्त्र्यार्थं कृतयुद्धान् शिवाजिसदृशान् स्वतन्त्रताप्रियान् वीरवरान् प्रति श्रद्धां समर्धयन्, जने जने गुरु-भक्तिं, भगवद्भक्तिं सञ्जनयन् संलक्ष्यते।

काव्यमिदमेकतो वीरतामयानि महान्ति महान्ति आयोजनानि आयोजितानि कुर्वद्

दृश्यते, एकतश्च तद् :

"जय जय देव गणेश। जय जय जय परमेश"।

"जय जय शिव हर शङ्कर। जय विश्वेश्वर हे॥(४७ तमः सर्गः)

इत्यादिकान्यनेकशः स्तोत्राणि विरचय्य भगवद्भक्ति-रसमाविर्भावयन् प्राप्यते। स म्लेच्छस्य दास्ये जीवन्तं जनं जघन्यकीटमेव मन्यते। सोऽत एव शिवाजिमुखेन कथयन्निदं श्रूयते :

"स्वधर्मनिष्ठोऽपि निजं य आयुः म्लेच्छस्य दास्ये नयतीह दशे" ४८/३३

काव्यमेतद् भारतीयान् भारतीयतायां प्रवर्तयितुं कठोरतया प्रयत्नं विदधत् क्व न दृष्टं भवति। तस्यैकैकः श्लोक एकैका पंक्तिरेकैकमक्षरं 'स्वदेशमेदिनी जननी इव, केनापि अनेन न तस्याः परतन्त्रता कदापि सहनीया, तां स्वतन्त्रां कर्तुं सञ्चालिते स्वातन्त्र्याहवे यदि प्राणा यान्ति तदा यान्त्वि'ति उच्चैरभिदधाति।

"नमो नमस्ते जयसिंह वीर श्री रामचन्द्रान्वयभव्य केतो"॥४६/३६

इत्येतदादीनि जयसिंहम्प्रति शिवाजेर्वचनानि सन्त्यस्मिन् विषये ध्यातव्यानि।

दुष्पारतन्त्र्यप्रहते हि राष्ट्रे को नाम धर्म इत्यत्र काव्यमिदं स्वकीयमतमेतत् प्रस्तवीति :

"दुष्पारतन्त्र्यप्रहते हि राष्ट्रे स्वातन्त्र्यसंस्थापनमेव धर्मः"५०/३९

नष्टस्वराज्यस्य जनस्य का नाम देवभक्तिरित्यत्र ब्रूते काव्यमेतत् :

"नष्टस्वराज्यस्य जनस्य नूनं स्वदेशभक्तिः खलु देवभक्तिः" ॥४६/५०

देशभक्तेर्यादृश उत्कर्षो, राष्ट्रियताया यादृशं स्फुरणम्, ओजस्विताया यादृश उद्घोष इह दृष्टो भवति तादृशोत्कर्षादिकं क्वान्यत्रेति न जानीमः संस्कृतवाङ्निबद्धे महाकाव्ये। अद्यतनाः शासनसूत्रधारिणो महाकाव्यस्याधःस्थितानि वचांसि शृण्वन्तु तानि च स्वाचरणे परिणमयन्तु :

"प्रजाहितं हितं राज्ञस्ततोऽन्यन्नैव किञ्चन।

तदसिद्धौ वृथा तस्य ह्यायुः कीर्तिर्बलं धनम् ॥५१/३१

पितृमात्रादिहीना वा नेत्रगात्रादिवर्जिताः।

पुत्रवत्परिपाल्यास्ते परमेशकृपैषिभिः ॥५१/३२

वनानां किमदुपयोगित्वमत्र वदति काव्यमिदम् :

लोकोजीवति धान्यं तोयेन वर्धते।

न विनातोयदैस्तोयं तद्वृष्टिर्न विना वनम् ५१/४३

अतः प्रभूतयत्नेन वनानि विविधानि हि।
रक्ष्याणि तुङ्गवृक्षाणि लोकजीवनमिच्छता ॥५१/४४

श्रेष्ठस्य कवेः काव्ये तत् सर्वं प्रतिबिम्बितं भवति यत् तस्यानेहसि घटते दृष्टं वा जायते। अद्य शासनस्थानां त एव भूयांसो ये स्वसुखैश्वर्यदृष्टयः। अद्य वनरक्षार्थं पुनः प्रयत्नो वीक्ष्यते। एतच्च प्रतिबिम्बितं भवत् संलक्ष्यते निर्दिष्टेषूपरिस्थश्लोकेषु।

अस्मद्देशस्य संस्कृतयां तीर्थेषु स्नानं गोदा-नर्मदादिसरिताञ्च महत्ता अतितरां स्वीकृतास्ति :

तीर्थे तीर्थे कृतस्नानः समभ्यर्चितदैवतः।
संश्रुतस्थानमाहात्म्यः स परां मुदमन्वभूत् ॥५२/४
उत्तीर्य भीमां गोदां च तपतीं नर्मदां नदीम्।
विन्ध्यमुलङ्घ्य दुर्लङ्घ्यं प्राप चर्मण्वतीतटीम् ॥५२/६

काव्यमेतद् यथावसरं पुरोऽस्माकं सीतात्रिकृष्णादिकथाः पौराणिकीर्निदधदस्मान् तत्तत्कथास्ववगतांश्च कुरुते :

देवाधिदेवोऽखिलदीननाथः कारालयान्तर्बत जन्म लेभे ॥५३/५८

× × × ×

सीता सतीनां धुरि कीर्तनीया प्रातः प्रगेयोज्ज्वलनामधेया ॥५३/५९

× × × ×

अत्रिस्तथा वन्दनरेभकौ च तपःकृतो मन्त्रदृशो मुनीन्द्राः ॥५३/६०

इष्टदेवस्यार्चनया तस्मिन् कृतया प्रार्थनया बन्धनान्मुक्तो भवति मानव इत्येतद् बोधयितुं काव्ये कविः प्रयतते :

"व्रतस्य तस्येश्वर ! पूरणार्थं कुरुष्व मां बन्धनपाशमुक्तम्" ॥५४/१४

× × × ×

"कदाचनध्याननिमीलिताक्षो व्यलोकयद् दृष्टमदृष्टपूर्वम्" ॥५४/१५

काव्ये या याः भगवति कृताः प्रार्थनाः शोभन्ते तत्र भक्ती रसो भूत्वा प्रवहति।

"अयि देवकृपा–महाम्बुधे शिव शम्भोऽखिलदीनवत्सल।
शरणं करवाणि तावकौ चरणावेव विघ्ननिवारकौ ॥५५/५

× × × ×

गुरुपापकृतापि संस्मृतो यदि केनापि कथञ्चन प्रभो।
निखिलाः खलु तस्य चापदो हरसीति प्रथितं यशस्तव ॥५५/११

यवनशासनकाले हिन्दुजनाहितमेव दृष्टमभूत्; तदा यवनसम्राट् :

"आदिदेश स्वधर्मीयानमात्यान् क्रूरकर्मणः।
श्रुतिस्मृतिपुराणोक्तं धर्मं विध्वंसितुं हठात् ।।५६/१७

इत्येतद्विधं क्रूरमत्याचारं कर्तुमादिशन् दृश्यते। भारतीया जना अत्याचारान् नाशयितुं प्रभूतं बलमर्जयुस्ते दृढिष्ठं संगठनं कर्तुं क्षमतां प्राप्नुयुरित्येतत्प्रयोजनेन कविः स्वकाव्ये तत्सर्वं वृत्तं निबध्नाति।

महाकठोरान्यायकल्मषाकुलशासनाधीनतायामपि देशे विपन्निवारकं शूराग्रगण्यं प्रति साहाय्यं प्रदातुं सुहृदः प्राप्ता भवन्ति। प्राप्तसुहृत्साहाय्यो वीरचरितो महापुरुषः स्वाध्यवसाये सफलतामधिगच्छति। अत एव शिवाजिः सिंहगढादिदुर्गविजयी वीक्ष्यते ! कविः स्वकाव्येनानेन जनतायामीदृशीमेव भावनां समावेशयितुमीष्टे। अहो धन्यास्तदीया वीरतापरिलसिताः पङ्क्तय इमाः :

संयुध्यमाना यदि ते म्रियन्ते जीवन्ति किं ते प्रपलायमानाः ।।५७/३८

× × ×

विजेतुमेनं खलु सिंहदुर्गं प्राप्ताः स्म एते वयमद्य नूनम् ।।५७/६९
शस्त्राघात-समुद्भूत-स्फुलिङ्गाभासु वीक्षितम् ;
प्रस्रवद्रुधिरक्लिन्नं तत्र वीरै रणाजिरम् ।।५८/२५

वीरं तद्बलमेगेयमभिषक्तं करोति :

"करूपेण सम्प्राप्तैः प्रभूतैः स्वर्णवर्षणैः।
चक्रे लक्ष्मीः प्रसन्नेव शिवराजाभिषेचनम् ।।५८/५४

वीरस्य सन्निकर्षं प्राप्य वीरतामयानि चारूणि चरित्राणि वीक्ष्य, वीरस्य वीरतासञ्चारकाणि च वचांसि श्रुत्वा अन्योऽपि उत्साहं, साहसं, बलं, सत्कार्यं कर्तुं पौरुषमश्नुते, अतः कविरिहापि यतमान ईक्ष्यते :

"इत्थं स्वराज्यरणवीरगुरोः शिवस्य
सन्देशवाचमधिगम्य नितान्ततुष्टः।
धृत्वाशिषं प्रणतिनम्रतमेन मूर्ध्ना
वीरः स्वराज्यविजयाय स सम्प्रतस्थे ।।५९/५१

शूरर्षभो राष्ट्रस्य सत्सेवकः स्वकीयं जीवनं सर्वमपि देशस्य सेवायां, दुष्टस्य पापीयसः साम्राज्यस्य पातने, शत्रूणां निग्रहणे च यापयेदित्येतच्चोपदिशति काव्यमत एव तु यत्र तत्र सर्वत्र पङ्क्तय एतद्विधा संलभ्यन्ते :

"बान्धवाः किं नु वक्तव्यं विषमे समयेऽधुना।
साम्राज्यमिदमस्माकं क्रमशो याति यत्क्षयम्" ॥६०/१६

"पूर्वं फतेहखानोऽसावफभुल्लश्च फाभलः।
जौहरश्च पराभूताः कुटिलेन शिवाजिना" ॥६०/२१

"चत्वारिंशत्सहस्रेण सैनिकानां स जौहरः।
न यं शशाक निर्जेतुं षष्ट्या तेनाधुना जितः" ॥६०/२४

अस्य काव्यस्य महतः क ईदृक् सर्गो यत्र न समरानलो ज्वलन् दृश्यते। सुखेषु मानवस्य पतनं भवति, संघर्षेषु, विपत्सु, सत्सु प्रज्वलत्सु युद्धपावकेषु मानव उत्तिष्ठति; भवति स उत्तमोत्तमगुणास्पदमित्येष कवेः विश्वासो द्रढीयान्। अत एव तु तत्काव्यम् :

"दावाग्निजटिलज्वाला···धावन्तो मेनिरे लोकैर्वीरास्ते प्रलयङ्कराः"॥ ६१/२०

"ताः सप्तजिह्व-जिह्वाज्ज्वलन्त्यः खड्गविद्युतः।
क्षणाद् विध्वंसयाञ्चक्रुर्म्लेच्छवीरान् सहस्रशः" ॥६१/२२

ईदृशैः श्लोकैर्नितरां विभूष्यमाणं वर्तते।

काव्यमिदं काश्याः माहात्म्यं गायच्च दृश्यते :

"अस्ति वाराणसी नाम स्वर्णदीतटसंस्थिता।
पुरी पुण्यमयी साक्षात् विश्वेश्वरनिवासभूः" ॥६२/१

× × × ×

"न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
नासौ धर्मो महामान्यो यः काश्यां न विराजते" ॥६२/१६

युवानः काशीं गत्वा तत्र विविधेषु अनेकेषु च शास्त्रेष्वभिज्ञाः स्युरिति कविः कामयत इव।

महाकाव्यमेतत् सर्वविधसौन्दर्यसुन्दरं भवत् स्वकीयां छविं विकिरति। तत्र यथा श्लोके श्लोके तत्तदलङ्कारा गुणादिका राजन्ते तथैव ध्वनिर्गुणीभूतव्यङ्ग्यं च प्रकर्षं दधत् परिवीक्ष्यते :

ते महानन्दकल्लोला महाराष्ट्राब्धिसम्भवाः।
नितान्तं ताडयामासुर्म्लेच्छराज्यमहातटान्ः ॥६३/८

अत्र व्यङ्ग्यं वाच्यादवरमतो गुणीभूतव्यङ्ग्यम्,

"हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज"

× × × ×

स्वाहा स्वधा शची चैव लक्ष्मीश्चैव अरुन्धती ॥

× × × ×

मरुद्गणाः प्रीयन्ताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् ॥

इत्यादिश्लोकमन्त्रादिभिश्चतुष्षष्टितमः सर्गः कविना विभूषितः । पाठकाः पूजा-कर्मकाण्डादौ च रुचिं निदधीरन् इति-कविः कदाचित् काङ्क्षति ।

पञ्चषष्टितमः सर्गः षट्षष्टितमश्च सर्गः "सोमेन दत्ता ओषधय आपो वरुण सम्मिताः" इत्यादिकैरनेकैर्मन्त्रैः, 'एहि साधारणे देवि ज्येष्ठे दक्षसुते शुभे…'इत्यादिभिश्च नानामन्त्रैः समुद्भासितौ ईक्ष्येते । एतैः सर्गैः कवेरेकतः कर्मकाण्डनिष्णातत्वं ज्ञातं जायतेऽपरतश्च स इच्छति यत् तदीयं काव्यमधीत्य जना तत्र ज्ञानमवाप्तुं प्रयतेरन् ।

सप्तषष्टितमोऽष्टषष्टितमश्च सर्गौ राज्याभिषेकमहोत्सवशोभया दिव्यया देदीप्यमानो विद्योत्यमानश्च नितरां विलोक्येते । राज्याभिषेकं समायोज्य महाकविना प्रदर्शितं यद् यो जनो भवति शूरः सच्चरित्रो, धर्मत्राता, भगवदवलम्बी स जगति भगवतोच्चतमासनासीनः क्रियते । कविः काव्येनानेनेदमेवोच्चैर्ध्वनयति । कवेः कामनेयम् :

तमः प्रविलयं यातु रजो नश्यतु सर्वथा ।
सत्त्वमेकं परं मातर्वर्धतां भुवि सन्ततम् ॥६३/११८

कविः भूलोकं दुराचाररहितमभिमानरागदिशून्यं शमदमतपःशौचादिसद्गुण संशोभितं द्रष्टुमना अस्ति । स उक्तेन च श्लोकेन स्वकीयमिममेव भव्यं भावं ध्वनयन् लक्ष्यते । धन्योऽयं कविर्यो नानाविधेषु छन्दःसु कवितां स्वकीयामारचय्य जगतीं रसनिलीनां करोति ।

महाकवेर्महाकाव्यमेतत् सर्वथैव दोषरहितमिति तु नास्माकं निर्बन्धः परं नास्मदीया दृष्टिर्दोषान्वेषणे मतिं निदधाति इति कथयन्तो वयम् : "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" इति वच्मः । जयतु जयतु महाकविरयं, जयतु जयतु च तदीयं महाकाव्यमिदम् ।

राष्ट्रप्रेमपरं प्रसादविलसत् तेजस्वि शौर्योच्छलद्
धर्मज्ञापनतत्परं रसमयं शब्दार्थसौन्दर्यभृत्
आचारं भरतावनेरुपदिशद् भक्तिं हरेर्निर्दिशद्
एतत् काव्यमहो शिवाजिचरिताख्याने रतं मञ्जुलम् ॥

—:०००:—

# 'सीताचरित'-समीक्षणम्

(डॉ० कृष्णकान्त शुक्लः, एम. ए., पी-एच. डी., साहित्याचार्यः)

विंश्यां शताब्द्यां विरचितेषु संस्कृत-महाकाव्येषु सनातनोपाह्वश्रीरेवाप्रसाद-द्विवेदिविरचितं सीताचरितं महाकाव्यं स्वाभिनवरचनाप्रकारेण विशिष्टं स्थानमधिरोहति। अतिप्राचीनं पुरातनैः कविभिरनेकशो वर्णितमपि सीतायाश्चरित महाकाव्येऽस्मिन् कामपि विच्छित्तिं श्रियं च लभते। अस्य प्रारम्भः षट्पञ्चाशदुत्तरैकोनविंशतितमे (१९५६) ईशवीये वर्षे समाप्तिश्चाष्टषष्ट्युत्तरैकोनविंशतितमे (१९६८) वर्षेऽभूत्।

सीताचरितम् सीताया उत्तरचरितेन सम्बद्धमस्ति। अस्य कथानकं दशसर्गानभिव्याप्य तिष्ठति। सर्गाणां नामानि चेमानि — (१) राष्ट्रपतिनिर्वाचनम्, (२) जानकीकौलीनम्, (३) जानकीपरित्यागः, (४) साकेतपरित्यागः, (५) कुमारप्रसवः, (६) जानकीमुनिवृत्तिः, (७) विद्याधिगमः, (८) कुमारायोधनम्, (९) मातृप्रत्यभिज्ञानम्, (१०) समाधिमाङ्गल्यं चेति। श्लोकसंख्या च षडूनसप्तशतमिता। पूर्वं सागरविश्वविद्यालयस्य 'सागरिका' - त्रैमासिकपत्रिकायां प्रकाशितमिदं महाकाव्यं पञ्चसप्तत्युत्तरैकोनविंशतितमे वर्षे वाराणसीस्थ'मनीषा'प्रकाशनतः कवयितुः स्वोपज्ञ - संस्कृत - संकेत - हिन्दीभाषानुवादाभ्यां च सहितं प्रकाशितमस्ति।

पौरापवादभयात् सीतायाः परित्यागविषयके कथानके कविनानेकत्र मौलिक्यः कल्पनाः कृताः सन्ति। तद्यथा —

(क) दुर्मुखस्य सूचनानन्तरं मूर्च्छितां सीतां रामः स्वयमुत्थाप्य राजसभामानयति। तत्र च सर्वा मातरः समाहूयन्ते। भ्रातरश्चापि। तेषां समक्षमयं प्रस्तावः समुपस्थाप्यते। सर्वे विरोधं कुर्वन्ति। परं मूर्च्छानन्तरं चेतनतामागतवती सीता स्वयमेव स्ववनवासस्य प्रस्तावं करोति। सा नेच्छति यत्तदीयोपस्थिती राज्यव्यवस्थां विघ्नवतीं सम्पादयेत्।

(ख) सीतायास्तत्रत्यं भाषणं मौलिकी कल्पना।

(ग) सा भरततः स्वकीयानि वनवासांस्यादाय स्वयमेव वनं प्रति प्रचलति।

(घ) वनं व्रजन्तीं सीतां लक्ष्मण उर्मिला-सदनं प्रापयति। तत्र च सर्वासां भगिनीनां कथनोपकथनानि कवेः स्वकीयकल्पनाप्रसूतानि। आत्मना साकं वनं गन्तुमुद्यता भगिनीर्गृहमेधिताया एवावरोध्य सा वनं प्रयाति।

(ङ) वाल्मीकिः प्रातिभेन चक्षुषैव घटन्तीं सीताविरक्तिं, तत्परित्यागं, तस्याः पुत्रप्रसवं च पश्यति। पुत्रप्रसवानन्तरं च सीताभ्याशमागच्छति। पुत्राभ्यां साकं च तामाश्रमे प्रवेशयति।

(च) सीताया आश्रमचर्यायां कविना वनविकास - वनोत्थान - वनसंस्कारसमस्याः सुनिपुणं निरूपिताः।

(छ) अश्वमेधप्रसङ्गे चन्द्रकेतुलवयोर्युद्धावसरे शूद्रकवधात् प्रतिनिवृत्तस्य रामस्य स्वागते समायोजितायां सभायां ऋषिर्वाल्मीकिर्भूर्जपत्रपिहितां सीतामुद्‌घाटयति। कुशलवौ सीतारामाभ्यां परिचाययति। चन्द्रकेतुना भूयोभूयोऽनुरुध्यमानापि सीता जीवनस्य कृत्यशेषमनुपलभ्याव्युत्थानं समाधिं गृह्णाति। इत्थं सीताया भूमिप्रवेशकथां नितान्तमभिनवरूपे परिणमय्य कविना स्वकीया नवीनवृत्तोद्‌भाविनी शक्तिः प्रकटिता।

सीताचरिते कविः केवलमितिवृत्तमेव न निर्वाहयति। समकालीना राष्ट्रियसमस्यास्तासां समाधानं च तत्र प्रस्तौति। समाजसेवा, स्वाधीनता, बालसमस्या, कृषिसमस्या, शिक्षानीतिः, छात्रानुशासनम्, कुलपतिकर्तव्यम्, नारीजागरणम्, देशनिर्माणभावना, देशकर्णधाराणामाचारसंहितेत्यादि विषयानवलम्ब्य तस्य विचारा नितान्तं मौलिका मार्मिकाश्च। यत्सत्यं काव्यमिदं भारतीयसंस्कृतेर्मार्मिकं व्याख्यानमेव। यथा चाह सातकडिशर्मामुख्योपाध्यायः— "वस्तुतो भारतीयसंस्कृतेः स्वरूपमधिकृत्य कवेः किमपि वैशिष्ट्यमासीत्। तदेव भारतीयसंस्कृतेर्जीवातुभूताया मातुः सीतादेव्याश्चरितमवलम्ब्य कविनात्र प्रतिपादितमित्यवगन्तव्यम्।"

अस्य महाकाव्यस्य सीता 'करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथा' नास्ति अपितु तेजसस्त्यागस्य, तपसो विश्वबन्धुतायाश्च मूर्तिः। यथा चाह स्वयं कविः— "सीता हि भारतस्यास्य राष्ट्रदेवी। तामाश्रित्य कृतं काव्यं भारतीयेभ्यो नूनमेव नासामयिकम्। देवीयं भारतमहीरूपाया मातुरेवाङ्के विलीयते। ततश्च तेनैव देहबन्धेन सर्वदैव भारमस्या अपनेतुमुदयते। शस्त्रभूता सा शस्त्रिम्, शक्तिभूता सा शक्तिमन्तम्, ज्वालाभूता सा ज्वलनम्, श्रीरामं सनातनाद् विवस्वन्मण्डलात् तथैवाहरति यथा गायत्री द्युलोकात् पर्णम्।"

महाकाव्यस्य युगानुसारि रूपमाश्रित्य ग्रथितमिदं महाकाव्यं कवेः परिवर्तमानाया लोकरुचेः शास्त्ररुचेश्च स्पष्टं निदर्शनम्। तत्र 'सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः' प्रभृतयो महाकाव्यलक्षणान्यसन्त्यपि तस्य

स्वरूपं युगचेतनया सर्वातिशायि विदधति ।

महाकाव्यमिदं चिन्तनप्रधानं वैदुष्यमण्डितञ्च । परं वैदुष्यमुद्वेजकं न । तद्धि पाठकं चिन्तनाय प्रेरयति । तद्वैदुष्यं व्यर्थं यद्धि जगतोऽनुपयोगीति तस्याभिमतम् :

सुपठितमपि भूयसा वृथैवय द्विजललने! भवतीह पण्डितानाम् ।
यदि भवति न तत्प्रजाप्रतिष्ठापरमफलाय निवासिनां समाजे ॥
वत बुधजन एव सूत्रधारो भवति यदा प्रकृतेरनुक्रियायाः ।
जगति किमिति निष्क्रियत्ववज्रं रसमय एव हिनस्ति तां तदेषः ।
भवति कवयितुर्विपश्चितोऽदो व्रतमथवात्र महाव्रतं यदेषः ।
प्रतिजनहृदयं प्रकाशराशेर्विशदतया विशदीकरोतु कामम् ॥
स हि परमतपो निजार्थदर्शी भवति जनः परिशील्य यस्तु शास्त्रम् ।
विपथगतिजुषां गतीर्निरोद्धुं विरततया यतते न लेशमात्रम् ॥
(सीताचरितम् ७/२९-३२)

राष्ट्रियता, देशभक्तिः, संस्कृतिप्रियता, नारीशक्तिः, समाजसुधारः, चरित्र-चित्रणं, प्रकृतिचित्रणं, शब्दार्थबन्धुरता, रसाभिव्यञ्जना, वचोभङ्गिमा, अलङ्कार-योजना, चित्रात्मकता, वैदुष्यं, नवीनसन्देशः, जीवनदर्शनं, कविकर्मनिरूपणमित्येव-मादिका विशेषता महाकाव्यमिदं काव्यमालायास्तिलकं ख्यापयन्ति ।

राजनीतेः प्रजातन्त्रस्य च विषये कवेविचारा नितान्तं स्पष्टाः । स प्रजातन्त्रस्य सफलतायै जनतायाः शिक्षामनिवार्यां मनुते । अतएव रामः कथयति यत् सीयाया योऽयमपवादः पौर-प्रसारितोऽवलोक्यते तत्र जनताया अशिक्षैव हेतुः । तत्रापि च शासकत्वेन मदीयमनवधानं मूलकारणम्—

"ममैव किन्त्वत्र परिच्युतात्मनस्त्रुटिर्यदेषा जनतास्त्यशिक्षिता ।
पितुः सं दोषः शिशुरस्ति यद्विषं भिषम् हि वाच्यो यदि वर्धते रुजा"
२/२६

वाल्मीकिरपि सीतां प्रबोधयँस्तथैवाह:

"भगवति! परमेकमत्र तत्त्वं तव परिदेवनमूलमुन्नयामि ।
रघुपतिजनता न शिक्षितास्ति भवति च तन्त्रमितः सतां विरक्तिः ॥"
७/३५

प्रजातन्त्र-पालयितुर्दृष्टौ वैयक्तिकतायाः किमपि स्थानं न भवति । अतएवाह रामः—

"समाजधर्मः स्थित एकतोऽन्यतो विभाति वैयक्तिकता च मत्पुरः ।२/३५

रामेण वाल्मीकिना सुसंस्कृतावेव स्वकीयौ पुत्रौ स्वीकृतौ यतो हि भारतीयप्रजातन्त्रे प्रानुवंशिकतायाः कृतेऽवकाशो नास्ति :—

"न पिण्डमात्रं नृपसन्ततीनां यद्भारते राष्ट्रपतित्वमेति ।" १०/२४

भारतीयजनताऽद्यपि यच्छिक्षिता नास्ति तत्तस्य हृदयं भृशं दुनोति—

"इयमिह शुच एव हन्त वार्ता मनुसदृशैरपि राजभिर्धृतापि ।
नगरजनपदप्रजा विकासमधिभरतावनि सर्वथा न लेभे ॥" ६/६२

देशगौरवस्य कविरेकनिष्ठो गायकः—

भरतभुवनमस्ति तीर्थमार्यं ननु खलु तेन चराचरोद्दिधीर्षु ।
इति विविधमतिर्विभिन्नभाषो विषमगतिश्च जनो विकासमेति ॥"
६/६५

'जयति हि निजराष्ट्रस्वास्थ्यमेवार्यदृष्टौ' । ५/६६

इति हि कवेर्मान्यता । 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः' अयं गौरवपूर्णं उद्घोषोऽद्यापि कविमानसमुद्वेलयति: ।

"पुनरपि निगदामि तेन नासौ क्वचिदपि मस्तकमात्मनीनमार्यः ।
विनयपरिगतोऽपि शिक्षणाय श्लथयति कुत्रचनापि भारतीयः ॥"
७/२१

भारतीया संस्कृतिः काव्येऽस्मिन् विभ्राजमानाऽवलोक्यते: ।

"सुभगरुचिषु संयमः क्रमेषु, यमनियमेषु च सौभगं रुचीनाम् ।
इयमिह किल शिष्टताऽस्मदीया सहृदयता सचिवस्वभावसौम्या ॥"
६/३२

विचारसहिष्णुतास्ति भारतीयसंस्कृतेर्मूलम् :

"असति सति लघौ पृथौ च वृत्तिर्न विषमतामिह भारते प्रयाति ।
सति सति सति यद् विरुद्धवृत्तिः सरिति शिलेव शिवत्वमेति कश्चित्
६६/६

नारीगौरवं मातृशक्तिप्रतिष्ठा च काव्ये स्थले - स्थले स्वकीयां सुषमां विकिरतः । नारी सर्वथा समर्पितास्ति; तस्या 'स्व–कथनीयं किमपि नास्ति :

'अकृत मनसि - 'हन्त हन्त नारी जगति समर्पितचेतना परार्थे ।

न खलु न खलु विद्यतेऽत्र तस्या अणुपरिमाणमपि स्व-संज्ञितत्वम् ॥"
६/४

कविर्दाम्पत्यस्य सुन्दरश्चित्रकारः

"वस्तुतो यदि सुमानुषी सृतिः पद्मिनी श्रयति पद्मतां प्रिया ।
सास्ति चेद् यदि शिखा विभावसोरूष्मतां स्पृशति तत्र च प्रिया ॥"
सैव जीवनसुधांशुचन्द्रिका, सैव संस्कृतिवसन्तकोकिला ।
तां विना न चरितार्थतां सृतेः कल्पवल्लिमिव नन्दनावनेः ॥
हृदयं हृदयेन संवदेदयमात्मा च वपुः परिच्छिदाम् ।
अपनीय परात्परं विशेदिति हेतोर्गृहमेधिता सताम् ॥"
१३/६२–६७

पारिवारिकतां कविः सर्वथैवोदात्तदृष्ट्या प्रशंसति :

"योऽयं कुटुम्बरस एष हि नाकलाभः ।" इति । -
"चक्रात्मके जगति वत्सलतैव नेमिः ।" इति च ॥ ६/६५

शिशवो राष्ट्रस्य निधयो भवन्ति । तथा चाह कविः

"भवति विभवविस्तरो महीयान् ननु यदि वस्तु वनेचरत्वमुग्रम् ।
भवति बुधजनो न हि स्वदेशाङ्कुर इव बालजने कदाप्युदस्तः ॥"
६/४६

तथा च

"ममत्वतो यद्विनियोग एव राष्ट्राय बालस्य सतां प्रशस्यः ।"१०/२१

अस्माकमाश्रमा राष्ट्रापत्तिमपनेतुमेव स्थापिता भवन्तिः

"राष्ट्रापत्तिं' क्षपयितुमिमे निर्मिता आश्रमा नः ।"५/७०

आश्रमेषु स्वशासनव्यवस्थाऽनायासमेव चलति :

"इदमभिमतमेतदस्ति हेयं मतिरियमत्र जने जनेऽवदाता ।
नरपतिनिरपेक्षमत्र हन्त ! प्रचलति येन नृरूप एष मेध." ॥६/१५

भारतस्य शिक्षानीतिविषये कवेर्विचाराः सुतरां स्पष्टाः । स भारतीयां शिक्षामनुत्तमां मन्यते । ७/२१

शिक्षा छात्रस्य रुचिमनुसरेत्तदैव फलवती भवति । वाल्मीकिः कथयतिः

"युगलमिदमतः परीक्ष्य शिक्षारुचिमनुरुपमहं प्रशिक्षयिष्ये ।
व्रजति विफलतां सतां प्रयासो रुचिपयसां शिखिवर्त्मकर्षणेन" ॥७/२५

यस्य पार्श्वे सच्छिष्याः समायान्ति स गुरुर्धन्यः

"गुरुरपि खलु पुण्यभाक् स भूम्ना शिशव इमे ननु यत्कुले विनेयाः।
अनल इह महान् स मन्त्रपूतं वहति यतो हविरोषधीमहिष्ठम्" ॥७/२४

कुलपतीनामिदमेव कर्तव्यं यत्ते छात्राणां हृदयेषु विद्याया अग्निशिखां विसृत्वरीं विदधतुः

"शिशुहृदि शायिता च येन विद्याज्वलनशिखा स्पृशतीय विश्वरूपम्।
शिवतममिदमस्ति कारणं सत्कुलपतिपावनशारदानुभावः" ॥७/४

एतदेव विश्वविद्यालयस्वरूपं वास्तविकम्।

कविर्मूलतो दार्शनिकः। अतः महाकाव्येऽस्मिन् दार्शनिकता ओतप्रोतास्ति। द्वित्राण्युदाहरणान्येवात्र दीयन्ते। मानवस्य कर्तव्यमस्ति यत्स स्थूलकलेवर एव स्वकीयां दृष्टिं न स्थापयेत्। ततोऽप्यधिकं तेन सदैवान्तःस्थितमात्मतत्त्वमीक्षितव्यम् :

"मात्र कापि महती शरीरिणो मान्यता भवतु तत्कलेवरे।
तत्र गूढगतिरस्त्यवस्थिता तोयदेषु चपलेव चेतना" ॥३/४७

आत्मदर्शनं कृतवतोऽस्य दशा कस्यामलौकिक्यामेव स्थितौ प्रतिष्ठिता भवति :

"क्व द्वेषरागौ, क्व च लोभमोहौ, क्व क्रोधकामौ, मदमत्सरौ वा।
यदात्मलाभे परमात्मसंज्ञं ज्योतिः परं किञ्चिदुदेति पुंसि ॥
न देहभेदेन विभिद्यते स्वं विभिद्यते यच्च तदस्ति न स्वम्।
स्वनाम्निभूम्निस्थितिमान् बिभेति न वा वियोगान्न च देहपातात्" ॥
६/४-५

चित्तभूमौ स्थिते ज्ञानाख्ये प्रासादे यो दीपः प्रज्वलितो भवति स कदापि निर्वापितो न भवति :

"ज्ञानाख्ये मणिमयधाम्नि चित्तभूमौ
सस्नेहो मृदुतमभावनादशावान्।
शोकाख्यां ज्वलनशिखामवाप्य दीप्रो
दीपो यः स हि जगतीह दुर्निवारः" ॥५/२२

साहित्यिकसौन्दर्यदृष्ट्येदं महाकाव्यं नितान्तमेव महिमापूर्णम्। शब्दार्थयोर्बन्धुरत्वम्, अलङ्कृतीनां यथास्थानं विनिवेशनम्, पदानां नर्तितप्रायत्वम्, सूक्तीनां सौन्दर्यम्, अर्थगौरवम् प्रभृतयः साहित्यकगुणाः काव्यमिदं विशिष्टं स्थानं लाभयन्ति। रसाभिव्यञ्जनदृशा महाकाव्यस्यास्याङ्गी रसः शान्तः। सीताया अव्युत्थानसमाधौ

लीनत्वात्। करुण-वीर-वात्सल्यानामवतारणेऽपि कविर्नितान्तं सिद्धहस्तः। सीतायाः परित्यागकथां निशम्योर्मिला करुणरसस्य धारामिव प्रवाहयति :

"क्व ममत्वमयी गुरुस्वसा, क्व वनान्ताः क्व दशा तवेदृशी।
क्रकचान्नलिनीं सुपुष्पिणीं वद चेद् दारयितुं क्रमः क्षमः॥
कियती ननु रे विडम्बना नियतेर्मानवदेहधारिणाम्।
शतचक्रतयाऽद्य यावदाः शिरसि प्रोद्भ्रमति प्रमाथिनी॥
क्रियतां परमत्र किं जनैः कटुसामाजिकरीतिभीषितैः।
हृदयद्रविणेऽथ दुर्विधेर्यदि न प्रत्ययभूमिकार्च्यते॥" ४/४५-४७

अष्टमे सर्गे चन्द्रकेतु-लवयोर्युद्धे वीररसस्य परिपाकोऽवलोक्यते :

"क्व रथाः, क्व च मत्तेभाः, क्व हयाः क्व च पत्तयः ?
इति यत्र न योद्धारोऽबुध्यन्त कृतबुद्धयः॥
क्व तलं, क्व जलं, क्व द्यौः, क्व ग्लौः, क्वाग्निः, क्व भानुमान् ?
इति यत्र न धूलीनां पटले प्रत्यपद्यत॥" ८/२९-३०

वात्सल्यस्य चरमः प्रकर्षः सीता-चन्द्रकेतु-सम्मिलन-प्रसङ्गेऽवलोक्यते। सीतां वीक्ष्य चन्द्रकेतोः कीदृशी दशा सञ्जायते।

"स मातृभूमे रजसा विधाय भाले विशेषं विससर्ज पुत्रम्।
पुत्रस्त्वसौ नैव शशाक मोक्तुं तां मातरं तच्च तदङ्घ्रितीर्थम्॥
वात्सल्यशान्त्योरितिमिश्रभावे तस्यां स्थितेऽस्मिन् विदधातु धीरः।
इयं सितेदं पय एष सिन्धुरयं घटो वेति परिच्छिदां कः? १०/३६-३७

अलङ्कारयोजना कवेरस्य सर्वथा प्रशस्या। नवानामुपमानानां प्रयोगे कविरस्ति प्रवीणः। द्वित्राण्युदाहरणानि पर्याप्तानि स्युः।

लङ्कातः प्रतिनिवृत्तो भगवान् रामो भरतश्च मिलितौ तादृशीमार्यभूमिकां विरचितवन्तौ यथा हिमालयो महोदधिश्च मिलितावार्यभूमिकां (भारतभूतिं) विनिर्ममाते :

"स रामनामा भगवान् स मानवस्तथा च कश्चिद् भरतेतिनामभाक्।
विनिर्ममाते मिलितौ हिमाचलो महोदधिश्चापि यभार्यभूमिकाम्॥
१/२

सीतया, लक्ष्मणभरताभ्यां च संयुक्तो राम एवं शोभते स्म यथा कन्याकुमार्यां हिन्द-महासागरः सिंहलद्वीपश्रिया पूर्वापरतोयनिधिभ्यां च सङ्गत शोभते :

"स सीतया भ्रातृयुगेन तेनचान्वितः स्वपुरीं शुशुभे गभीरहृत् ।
कुमारिकायामिव भारतोदधिः ससिंहलश्रीरुदधिद्वयाञ्चितः ।।" १/३

वाल्मीकेराश्रमे लवकुशाभ्यां मिलितोऽयोध्याया राजवंशस्तथा विरेजे यथा ब्रह्मपुत्र-सिन्धु-नदाभ्यां युक्तोऽयं भारतदेशो विभाति :

"स राजवंशो मिलितः सुताभ्यां तथा तदानीं निपुणं विरेजे ।
लौहित्य-सिन्धु-द्वितयेन युक्तो विराजते हन्त ! यथैष देशः ।।" १०/२६

लव-कुशाभ्यां सहिता जानकी वाल्मीकि-तपोवने तथैव शुशुभे यथा हिमालये भूटान-नेपालाभ्यां भारतभूमिः शोभते—

"इति सुतयुगली सा सा च तस्याः सवित्री
ऋषिमुनिकविताढ्ये धाम्नि तत्रात्मलाभम् ।
अलभत हिमशैले भारतीया यथा भूः,
सह निजतनयाभ्यां भोटनेपालकाभ्याम् ।।" ७/६३

अर्थान्तरन्यासे कविः सिद्धः । केषाञ्चिदर्थान्तरन्यासानां सूक्तीनां प्रसङ्गे चर्चा कृता स्यात् । अन्येऽप्यलङ्कारा यथास्थानं विराजन्ते ।

कवेर्भाषाधिकारः प्रशस्यः । शब्दार्थावहमहमिकया वर्ण्यविषये समापतन्तौ वीक्ष्येते । आश्रमे सीता जनैर्वीक्षितेति वर्णयन् कविश्चित्रमवतारयति :

"पद्मासनस्था कमलेव नूत्नपयोधिमन्थादुपजायमाना ।
प्रज्ञेव पूर्णा विमले मुनीनां पदे पुनर्भास्वरतां दधाना ।।
ज्योतिष्मतीवेन्दुकलेन्दुमौलेर्नेत्रेषु लोकस्य सुधां दुहाना ।
वपुष्मतीव श्रुतिसंस्कृतिर्नः संन्यासकाषायमुपासमाना ।।
छन्दःस्वतीव प्रतिभादिसूरेः प्रसादसौम्याश्रयतां श्रयाणा ।
सा संघशक्तिर्मुनिशोणितस्य सा कापि पुत्री पृथिवीतलस्य ।।
सा कापि पत्नी पुरुषोत्तमस्य सा कालरात्रिर्दशकन्धरस्य ।
भूर्जे हृते स्थाण्डिलमण्डले सा राष्ट्रस्य देवी च पुनर्व्यलोकि ।।"
६/५१-५४

परःशतानि सुभाषितरात्नानि काव्यमिदं सर्वतः समुद्योतयन्ति । दिङ्मात्रं यथा :

(१) समजेषु निरर्गलेष्वपि श्रयते निर्घृणता न तां प्रथाम् ।
श्रयते मनुजेषु यां खगाः किमु नो नीडभृतः प्रजाकृतेः ।।

(२) अपि मुद्रयितुं जनाननं स्वसती त्यागविधिः किमौचिती ?

नियतं विधुमूर्तिमप्यसावनृताङ्कां न कदापि सेवताम् ॥

(३) ऋतमेकमुपासितुं जने यतमानेऽनृतभाषणः शतम् ।
उदिते रविमण्डलेऽन्यथा प्रलपन्तो न न कौशिकोपमाः ॥

(४) यदि विश्वसनस्य भूमिकामुपरिष्टाच्च मनुष्यभावनाम् ।
अधिकृत्य न सम्प्रवर्त्यते न समाजः स महद्धि तच्छलम् ॥

(५) परमार्थविचारणेऽत्र चेत् सदसन्नीररजोविवेचिनीम् ।
कतकोपमितां मतिं महान् भजतां मानवता कृतक्रिया ॥

(६) श्रुतमस्ति न वंशदारणो भ्रमरः पङ्कजकोषमिच्छति ।
रसपायिभिरात्मनः करैरपकर्तुं पटुरत्र मानवः ॥

(७) आवश्यकाद् योऽधिकं ब्रवीति स शारदायाः कुरुतेऽवमानम् ।

(८) मितं न यद् यच्च न हन्त सारं विलापनामात्रमिदं स्ववाचः ।

(९) परस्य शोकः परचेतनाया कारुण्यमूर्त्या परिवर्तते हि ।

(१०) मित्रे, रिपौ, जरति, बालजने च लब्ध-
लाभा भवन्ति बिबुधाः समदर्शिनो यत् ।

(११) शास्त्रेषु विद्या पदवाक्यरूपा शिष्टेषु चैषार्थतया विभाति ।

(१२) को वा ब्रवीति 'क्षणशः प्रयाति संसार एष प्रलयाग्निगर्भम् ।
स मीलिताक्षो वत मातृकुक्षिकुमारशक्तिद्वितये वराकः ॥

४/३०, ४०, ४२, ४६, ५० । ६/६०, ३६, ४३, ६३ । १०/६, ३६

प्रकृतिवर्णने कवेर्मनो यथावसरं रमते । सप्तमसर्गस्य सन्ध्यावर्णनात् केचन श्लोकाः समुपस्थाप्यन्ते :

"बटुजन इव सान्ध्यिकप्रणामस्वर उदियाय पतत्त्रिणां समूहे ।
ऋषिजन इव किं च दिग्विभागादुटजभुवं समियाय गोसमूहः ॥
दिवसशतदलं दलानि कृत्स्नान्यपि करसम्पुटतां व्रजानि कृत्वा ।
रविमभि हृदयेन यामयात्रा प्रणतिपरं भुवनान्तरे व्यलोकि ॥
भवति विरलसंहतेः सदैव युतिमहतोऽपि जनस्य शत्रुशातः ।
इति वददिब दीपकं तमांसि शिरसि बभार रवौ गतेऽस्तमर्के ॥
तदनु कपिलधेनुतां दधाना विशदरुचामपदेशतः स्वदुग्धैः ।
अधिगतशशिवत्सका निशा सा भुवनघटं परिपूरयाम्बभूव ॥"

७/४२, ४८, ५०, ५२

कवेः शैली वैदुष्यपूर्णा । स्थाने - स्थाने शास्त्राणां पारिभाषिकाः शब्दाः सन्दर्भश्चानायासमायान्ति । पदशय्या न नितान्तं मसृणा । क्वचिद् अप्रसिद्धाः शब्दा अपि तेन प्रयुज्यन्ते । उदाहरणार्थम् — अग्नेः कृते 'कृपटयोनिः', पितुरर्थे 'वप्रः' चिरप्रसूतायाश्चार्थे 'वष्कयिणी' — एवंप्रकारकाः शब्दाः कवेः कृतिं प्रसादतोऽन्यां दिशं नयन्ति । क्वचिद् भाषायां हिन्दी - लोकोक्तीनां प्रभावः समवलोक्यते । यथा सीतां प्रति जनकोक्तौ — 'वत्से ! मम त्वं सिततां गतानां लज्जासि सिद्धा मम मूर्धजानाम् ।'

कविः कविकर्मणः सम्यग् वेत्ता । स्थाने - स्थाने तेन कविकर्मविषये स्वकीया विचाराः प्रकाशिताः । सः कथयति यत् कवेरिदं महाव्रतं यत्स प्रतिजनहृदयं प्रकाशराशेर्विशदतया प्रकामं विशदीकरोतु । ७/३१ । बोधाख्यज्वलनशिखैव सूरिश्चेतनाचेतनयोर्भेदबुद्धिं परिहाय स्वपरमनोगतान् भावान् परमार्थतो विविनक्ति—

"बोधाख्यज्वलनशिखैव कापि सूरिर्वेवेक्ति स्वपरमनोगतान् स भावान् ।
तद्दृष्टौ जड इति चेतनेति भेदः कार्पण्यात् प्रकृतिकृतान्न सिद्धिमेति
५/३१

नात्र सन्देहो यदसौ कविः स्वकर्मणि, स्वलक्ष्ये च सर्वात्मना सफलः संवृत्तः । मानवतायाश्चरमो विकासस्तस्य जीवनदर्शनम् —

"नृ.णामाः प्रविकचचेतनाशिखानामुत्सङ्गः प्रकृतिविनिर्मितोऽपि लाल्यात् ।
सङ्कीर्णः समजनि पक्षिसन्ततीनां मुक्तानामिव वत पञ्जरप्रदेशः ॥
तेनासौ कतिपयभित्तिभिर्निबद्धे गेहाख्ये वियति निवासमेव वासम् ।
मन्वानः श्रयति नु दासताममुष्य व्याकीर्णं भुवनमिदं करोति न स्वम् ॥
धिक् कोऽयं 'निजरुचि' नामको जनानां विश्वस्मिन् मनसि शयोऽस्तु भेदहेतुः ।
येनेदं जगदखिलं समुद्रशैलनद्याद्यैः शकलितमेकतां न याति ॥
एते ये भुवनतले चितेर्विकासा दृश्यन्ते निपुणतरं विभिद्यमानाः ।
सस्वैतैः सहचरसोदरैः समेता भ्राम्यामः, किमिति वियोगमाप्नवाम ॥
मानुष्यं वपुरधिगम्य यस्तु तत्त्वं निर्देष्टुं प्रभवति नापि वीक्षितुं स्वं ।

मात्राभिर्विघटितचक्षुणस्तु तस्य सर्वत्र प्रसरति नाग्रतो न रात्रिः ॥

५/७, ८, १०, ११, १४

गुणगणपरिपूर्णेऽस्मिन् महाकाव्ये काश्चन दोषकणिका अपि यत्र क्वचिद् विलोक्यन्ते । यथा 'कातर्थ्यं' - (८/३८) पदप्रयोगे । क्वचित् कालदोषो यथा सीताचरणयोर्नतस्य चन्द्रकेतोस्तुलनां द्वावेव कर्तुं पारयतः, कन्याकुमारिकायां भारतभूम्यै नतो विवेकानन्दोऽथवा महासमुद्रः । अत्राधुनिकस्य विवेकानन्दस्योपमानरूपे प्रयोगश्चिन्त्यः । यथावा — वाल्मीकेराश्रमे एकत्रितं समाजं माङ्गलिकं विधिं च वीक्ष्य जनकस्य सीताया विवाहमाङ्गल्यकालस्य पुनःप्रवर्तनरूपायां कल्पनायाम् —

"रामं कृशं कृशतरां तनयां समाजं
तत्राभिवीक्ष्य मुनिधाम्नि शुभां श्रियं च ।
मेने तदा स जनकोऽपि सुताविवाह —
माङ्गल्यकालमिव तत्र पुनः प्रवृत्तम् ॥" ३६

सीताया विवाहविधेः पुनः प्रवर्तनं कामं तद् रामेणैव स्यादनुचितम् । एवमेवेयं कल्पनापि न रुचिकरा यत् सीता वनं गच्छेद् येन तस्याः पौत्रा सच्छिक्षां लभेरन् । किं पूर्वतना रघुवंशाङ्कुरा एतादृश्यामसामान्यायां स्थितौ वनवासिनः सन्तः एव विद्यामधिजग्मुः ?

परमिमे दोषा गुणानां दृष्टावुपेक्ष्या एव ।

सातकडिमुख्योपाध्यायो महाकाव्यस्यास्य मूल्याङ्कनं कुर्वाणोन्वर्थं कथयति —

"The poet is no doubt a classical scholar and has composed the poem very strictly adhering to the norms of clsssical writing, but he has been successful in giving his theme a new trend which will definitely satisfy the modern Indian mind. The chief sentiment of the poem is patriotism to the true sense of the term which has been blended with love for humanity irrespective of caste and creed.

The philosophy of Indian life and the ideal of Indian polity have very well been depicted in the poem. To achieve his purpose the poet has re-adjusted and re-

arranged the theme, but in doing so he has only followed the path of the great poets like Kalidas and Bhavabhuti. He has also adduced new interpretations to some phenomena; as for instance, he interprets Sita's entering the womb of the earth as attaining to avyutthan Samadhi by yog and then being buried, according to the custom of the Indian yogis, by the great sages as Vasistha, Janak, Valmiki, etc. Sita of this epic is not only the ideal of devoted wife but she is a noble woman who is ready to saerifice all her happiness even life for the welfare of the Universe."

(प्रधानसम्पादकस्य निवेदनम्, सी॰ग॰ पृ॰ ७–८)

अस्य महाकाव्यस्य विषये स्वयमेव कविना यत्कथितं तदप्युल्लेखनीयं विद्वद्भिः : "सर्वथा अत्र विचारा राष्ट्रियाः, भूमिका सामाजिकी चरित्रं धार्मिकं, प्रवृत्तिर्दार्शनिकी, व्यक्तिः कवित्वमयी, कथानकं च प्रवाहपटु। तेनात्र देवताप्रस्तरौ पुरातनौ। शिल्पप्रतिष्ठे तु नूतने। अतएवेयमस्माकमाशी :—

ऋषिः सनातनश्छन्दो जगती शक्तिरार्यता।
दैवतं राष्ट्रमोजः सत्कीलं, बीजाक्षरं तपः।।
यत्र तन्मन्त्रकाव्यं मे विनियोगमवाप्नुयात्।
सार्वभौमे सतां शान्तिनाम्नि पुण्ये महाक्रतौ।।

अस्ति चायमस्मदीयः प्रणयः—

न यशसे, न धनाय, शिवेतरक्षितिकृतेऽपि न नैव कृतिर्मम।
इयमिमां भरतावनिसंस्कृतिं सुरगवीं च निषेवितुमुद्गता।।
सहृदया हृदयस्य मतेश्चितेरपि च तां परमां भुवमाश्रिताः।
कृतिमिमां कलयेयुरिरम्मदं वृणुयुरम्बुघनाश्च घनाघनाः।।

(महाकविकृतात् 'मुखबन्धात्', पृ॰ १७)

इयं नूतना शिल्पप्रतिष्ठा संस्कृतमहाकाव्यजगति नूनमेव काम्प्यभिख्यां विदधाति आवर्जयति च सहृदयान् स्व पुनःपुनरनुसन्धानाय।

—

## श्रीस्वामिविवेकानन्दचरितस्य महाकाव्यत्वम्

(श्रीमती शशि तिवारी, एम. ए., पी-एच. डी.)

"धर्मं विना विश्वसमाजवर्गो भवेदरण्यं पशुभिर्विकीर्णम् ।
भोगा विलासा न मनुष्यधर्मा ज्ञानं परं जीवनलक्ष्यमुच्चैः ॥"

१०/३५

एवं प्रकारेण सर्वप्रथमं विश्वसमाजे शिकागोधर्मसभायां वैदिकधर्मगौरवस्य संस्थापकाय श्रीविवेकानन्दाय नमः ।

विद्वद्वरसाहित्याचार्यश्रीत्र्यम्बकभण्डारकरमहाकविना प्रणीतं महाकाव्यरूपमभिनवं ग्रन्थरत्नं विद्यते - श्रीस्वामिविवेकानन्दचरितम् । विंशयाः शताब्द्याः त्रिसप्ततितमे वर्षे प्रकाशितं नवसंदेशप्रदं दार्शनिकभावपूर्णमिदं महाकाव्यमस्ति सहृदयहृदयावर्जकैः पद्यैः माधुर्यपूर्णशैल्यां निबद्धं सुरभारतीरसिकविद्वद्भिर्भृशं प्रशंसितम् । अस्य माहात्म्यं वर्तते न केवलमाधुनिकसंस्कृतकाव्यक्षेत्रेऽपितु राष्ट्रीयजीवनेऽपि । डा० मङ्गलदेवशास्त्रिमहाभागैः निगदितमस्मिन् विषये — 'भारतराष्ट्रस्य कृते नूतनसंदेशदातृस्वामिविवेकानन्दस्य विचारामृतधाराप्रस्यन्दि काव्यमेतत् ।'

प्रत्यग्दर्शनशास्त्रबोधविहितप्रज्ञेन, सुपर्ववाङ्मयसुधाचार्येण, अभ्यस्तश्रुतिशास्त्रभारतपुरातत्त्वेन, काश्यां द्वादशवर्षभैक्ष्यचरणासक्तेन, तत्त्वज्ञानपुराणसंस्कृतगिरां शिक्षाकृता, ज्योतिषशास्त्रशीलनपरस्वान्तेन, अद्वैताश्रमसेवकेन, पञ्चचत्वारिंशद्वर्षपर्यन्तशिक्षणविधिव्यग्रेण, बाल्ये लब्धयतीन्द्रदर्शनसुखेन, हिन्दीवाङ्नवनृत्यनाटककृता, श्रीस्वाम्याश्रयखण्डकाव्यरचनाप्रीतेन, 'उपदेशसाहस्त्री' इत्याख्यनवोपदेशकविताचितेन, चित्रकलाविशेषयशसा, वाणीमन्त्रजपप्रसक्तमनसा, 'कादम्बरीचम्पू' इत्याख्यचम्पूकाव्यरचनाकृता, स्वराज्यान्दोलनसमये (१९०९–१०) कारागारगतेन, त्र्यम्बकसूरिणा धर्मप्रधानाश्रयं श्रीस्वामिविवेकानन्दचरितमनुसृत्य क्लृप्ता अष्टादशसर्गात्मिका सरसा, सुवृत्ता, संसेवनीया कीर्त्येयं कृतिः साहित्यदर्पणकारनिर्दिष्टमहाकाव्यस्वरूपानुसारं नूनमेव महाकाव्यात्मिका । प्रमुखतस्तु परम्परागतानि सर्वाणि प्रसिद्धानि लक्षणानि अत्र घटितान्येव ।

अस्य सर्गात्मकमहाकाव्यस्य प्रथमसर्गे वर्णितम् यदौपनिषदं सन्देशं विशदीविधातुं निर्वाणमार्गमुपदेष्टुं च चिरशान्तिदूतः यतीन्द्रः भावी विवेकानन्दः नरेन्द्रनाथः धर्मक्षेत्रविषयेऽतितरां विवादोत्पत्तिसमये भूतलेऽवतीर्णः । अस्मिन्नेव सर्गे विवेकानन्दस्य

निर्भयता ध्यानसिद्धता सङ्कल्पविकल्पदोलितमनःस्थितिश्च वर्णिता । द्वितीये सर्गे युगावतारश्रीरामकृष्णपरमहंसेन सह तस्य सङ्गमः, तृतीये सर्गे देशिकेन्द्रेण अद्वैतज्ञान-निधिना गुरूत्तमेन परमहंसदेवेन सह नरेन्द्रस्य मतभेदाः, तेन दीक्षाप्राप्तिश्च, वर्णिता । यथा नरेन्द्रेण परीक्ष्यैव श्रीरामकृष्णः गुरुरूपेण स्वीकृतः तथैव गुरुगुरुरपि परीक्ष्यैव तम् शिष्यत्वेनाङ्गीचकार, परिणामतः गुरोः अतुल्येन आत्मबलेन नरेन्द्रः तस्य वशमागतः । कविः वर्णयति —

'गुरोरतुल्यात्मबलान्नरेन्द्रः प्रोद्यमहस्तीव वशं जगाम ।
अङ्गीचकारैनमनुक्रमैण सन्मार्गनिर्देशकमात्मनस्तम् ॥ ४/४०

विवेकशालेन लोकसेवा एव अन्त्यं उद्देश्यं निर्णीतम् । बी. ए. पदवीलाभेन, परम-हंसदेवात् वेदान्तविद्याधिगमनेन च तस्य हृदये पूर्वपश्चिमदिशोः परस्परसङ्गमस्य बीजमिव उप्तम् । निजबान्धवानां पोषणभारव्यग्रोऽपि सः भवतारिणीम् प्रार्थितवान् —

'अहं न वृत्ति न धनं समीहे निरन्तरं दर्शनमेव मातः ।
ज्ञानेन सार्धं प्रतिपद्य भक्ति विवेक वैराग्ययुतो भवेयम् ॥ ५/४१

अयं लक्ष्यनिश्चयोऽस्ति पञ्चमे सर्गे प्रतिपादितः । असाध्यरोगतां गतः श्रीरामकृष्णदेवः वराहनगरे नरेन्द्रं य तिव्रते सन्यासे दीक्षितवान्, जपमालाः गैरिकाणि वसनानि च अर्पयामास, निर्वाणात् प्राग् 'गीः शुभास्तु तव विश्वभारती याहि पुत्र जगतोऽसि मङ्गलम् (६/३४)' इति शुभाशिषा अब्रवीत् । गुरुनिर्वाणानन्तरं गुरुणोक्तं कार्यं कथं भवेदिति चिन्तितः सः यतिः नगरेषु तीर्थेषु हिमप्रदेशेषु च अभ्रमत् । अमेरिकायां 'शिकागो' पुरे धर्ममहासभाधिवेशने भारतधर्मसदस्यरूपेण तेन सनातनवैदिकधर्मगुरुणा वेदान्तधर्मः उच्चासने सन्निविष्टः । तस्य प्रभाविभाषणैः अमेरिकावासिनां मनस्सु पूर्वीयः ज्ञानप्रकाशः जातः, भारतस्य प्रतिष्ठा च विश्वे स्थापिता अभूत् । नवसंदेश-हारकेन स्वामिना स्वोपदेशैः जीवसेवा कृता । विदेशे अनेके जनाः स्वामिनः वक्तृता-कौशलेनैव प्रभाविताः जाताः । पाश्चात्यदेशेषु स्वकार्यपूर्त्यनन्तरं स्वदेशदर्शनौत्कण्ठि-तस्य विजयशीलस्य विवेकानन्दस्य भारतागमनं वर्णितमस्ति चतुर्दशे सर्गे । 'शिवज्ञा-नात् जीवसेवा' इति व्रतं धारयित्वा महर्षिणा भारते लोकानां कल्याणभावनया राम-कृष्णाख्यः संघः स्थापितः । देशभक्तिस्त्रीशिक्षात्मसंविद्धर्माध्यात्मजगत्कारणादिविष-येषु विश्वगुरुणा उक्ताः महत्त्वपूर्णा उपदेशा उपदेशात्मके षोडशे सर्गे कविना सुष्ठु निबद्धाः । भारतीययुवकान् अपि सः उपादिशत् देशसेवाकार्याय पारतन्त्र्यनिवारणाय च । ऊनचत्वारिंशद्वर्षाणांमल्पावस्थायां कर्मवीरेण यतीन्द्रेण सार्धं सहस्रवर्षपर्यन्तम्

आवश्यकभाविकार्यं कृत्वा बेलूरतीर्थेऽधिगतं महामहाशान्तं परिनिर्वाणम्। एवं प्रकारेण श्रीविवेकानन्दस्य सम्पूर्णजीवनघटनामनुसृत्य रचितमिदं काव्यम्। निस्सन्देहम् इतिहासोद्भवं सज्जनाश्रयं वृत्तमिदस्य महाकाव्यत्वं पुष्णाति।

प्रकृतमहाकाव्यस्य नायकोऽपि विवेकानन्दः। विश्वनाथपुत्रः दत्तकुलोत्पन्नः नरेन्द्रनाथः नास्ति कोपि राजा, सुरः वा, यथा कथयति साहित्यदर्पणे कविराजः 'तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।' परं श्रेष्ठनैतिकमानसिकबौद्धिकाध्यात्मिकगुणैः विश्वविवेकदीपः सः विश्वनायकः जातः:: अतोऽभिनवमहाकाव्यस्य नायकत्वे प्रभवति। कविः काव्यस्य प्रारम्भे महाकाव्यनायकरूपं श्रीविवेकानन्दस्वामिनं प्रणिपत्यैव मङ्गलान्तरं निर्दिशति—'एकोऽनिशं विजयते स यतिर्विवेकः'। येनापि प्रतीयते सः कवेरभिमतो नायकः। काव्यस्यादौ मङ्गलाचरणात्मकौ श्लोकौ स्तः, तयोः प्रथमस्तु श्रीरामकृष्णदेवाय वर्त्तते, द्वितीय श्रीविवेकानन्दाय।

काव्यस्य रसः प्राणतत्त्वम्। 'नहि रसादृते कश्चिदर्थः प्रवर्त्तते भरतमुनिनापि निगदितम्। महाकाव्ये वर्णनचमत्कारः कथावस्तु वा पाठकमनुरञ्जयति, परं भावाभिनिवेशनार्थं रसतत्त्वस्य आवश्यकता प्रतीयते। विश्वनाथकविराजेन निर्धारितम्— 'शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते'। तदनुसारं धर्माश्रयप्रधानेऽस्मिन् आदर्शभूते पवित्रे विवेकचरिते शान्तरसस्य प्राधान्यं दरीदृश्यते। रसानुभूतिदृष्ट्या शान्तरस एव अङ्गीरूपे कविनाऽपि स्वीकृतः। षष्ठसर्गस्य अन्तिमश्लोके सः कथयति—

शान्ते महाकाव्ये त्र्यम्बकसूरिणा विरचिते ......।

गुरुप्रयाणे स्वामिनिर्वाणे च शान्तजन्याद्भुतरसानुभूतिः जायते। परमहंसदेवेन विहितायां भवतारिण्याः प्रार्थनायां भक्तिभावः, विवेकानन्दकृते भारतवर्णने देशभक्तिभावः गौरवभावश्च उत्पद्यते। शान्तरसनिर्वाहे कविना स्वहृदयस्य गम्भीरभावावेशस्याभिव्यक्तिरपि कृता।

उपदेशपूर्णचित्रणस्थलेषु प्रभावोत्पादकता, मार्मिकता, सहजतरलता, अनुभूतेः प्रतिबद्धता उल्लेखनीया अस्मिन् महाकाव्ये, तदर्थं कविना विविधजीवनव्यापारा अपि उद्घाटिताः। प्रकृतिवर्णने कवेः सौन्दर्यात्मकता, कल्पनावैचित्र्यम्, नगरवर्णने तस्य सूक्ष्मनिरीक्षणशक्तिः देशविदेशयोर्भाषादर्शधर्मसंस्कृतिभूगोलज्ञानम्, स्तुतिगीतेषु तस्य भक्तिसंवलितं मनः, हार्दिकभावाभिव्यञ्जना भावसान्द्रता, गेयता च विशेष तथ्यानि सन्ति।

काव्याभिव्यक्तेर्वैशिष्ट्यं संगीतात्मकता। निस्सन्देहं गीतिकाव्ये गेयतायाः प्राचुर्यं भवति, किन्तु महाकाव्ये भाववशात् छन्दसां परिधाने एषा स्वभावतः समागच्छति। भावानुसारं छन्दसां प्रयोगविधौ परमकुशलेन भण्डारकरकविना प्रतिसर्गं भिन्नवृत्तस्य प्रयोगः कृतः। सर्गसमाप्त्यवसरे वृत्तपरिवर्तनमपि विहितम् 'अवसानेऽन्यवृत्तकैः' इति नियमानुसारम्। यथा द्वितीयसर्गे सर्वत्र वसन्ततिलकावृत्तं, परं अन्तिमश्लोकः मालिनीवृत्ते निबद्धः वर्तते। कवित्र्यम्बकस्य प्रियाणि वृत्तानि — अनुष्टुप्, वसन्ततिलका, वंशस्थं, उपजातिः इति। दशमः सर्गस्तु विविधवृत्तमयो विशेषतस्तु तत्र तत्तच्छ्लोकगतवृत्तनामापि विद्यते।

विवेकचरितस्य शैली स्वाभाविकतायाः प्रासादिकतायाश्च उत्कृष्टमुदाहरणमस्ति। पद्यानि भावपूर्णानि, सरसानि च, शब्दचयनं सुन्दररूपेण सम्पन्नम्, यथा — विना नरेन्द्रं नहि रामकृष्णः श्रीरामकृष्णं' न विना नरेन्द्रः। काव्येऽस्मिन् रमणीयता, स्वरसौष्ठवमाधुर्यादिविलासाश्च दर्शनीयाः सन्ति। यथास्थानं स्वभावोक्तिः, उपमा, अर्थान्तरन्यासः, उत्प्रेक्षा, श्लेषः तथा अन्येऽलङ्काराः लभ्यन्तेऽत्र। कविरुत्प्रेक्षां करोति—

यतिजीवनमेव सद्गुरोरुपदेशात्मकवाक्यसंहतौ।
जनुषः पुनरावपुःक्षयं किमु कार्यात्मकभावसम्मितम्॥ १७/४

गुरुणा य उपदेशः कृतः, तस्योपदेशस्य कार्यात्मकटीकास्वरूपमिव विवेकानन्दस्य जीवनम् इति।

अनेकाः पाण्डित्यगर्भितचमत्कारपूर्णा विशेषता अस्य ग्रन्थस्य काव्योत्कर्षं प्रतिपादयन्ति। सर्गाणामादिमाक्षरैः श्रीस्वामिविवेकानन्दचरितनामकमहाकाव्यमिति काव्यशीर्षकं सम्पद्यते। अपरा विशेषता, प्रतिसर्गमन्तिमश्लोके कविना शान्तिशब्दप्रयोगः कृतः। द्रष्टव्यमस्ति यत् तृतीयसर्गे एकादशसर्गे च क्रमशः तृतीयाक्षरैः श्लोकौ सम्पद्येते। सर्वेषां सर्गाणामाकर्षकाणि उपयुक्तानि नामानि च महाकविना निर्धारितानि।

इदम् महाकाव्यमुपदेशदृष्ट्याऽपि अनुपममस्ति। उपदेशात्मकेऽस्मिन् काव्ये वर्तमानभारते प्राप्ता अनेकाः समस्याः सहजरूपेणोद्घाटिताः, तदर्थं कविर्बहुशः अशिक्षामस्पृश्यतां, निर्धनतां, नारीदुर्दशां, वर्णभेदं च वर्णयति निन्दति वा। जगति प्राच्यप्रतीच्यसंमेलनात् नवसंस्कृतिनिर्मितः सर्वधर्मसमन्वयो नवीनशान्तिमयजगन्निर्माणमेव प्रकृतमहाकाव्यनायकस्यान्तिमं लक्ष्यमासीत्, परोक्षतः नूतनमहाकाव्यस्यास्येदमेवैकं

फलम्, 'चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्' इति नियमानुसारम्। प्रस्तुत-संक्षिप्तविवेचनेन स्पष्टमस्ति यदाधुनिकसंस्कृतकाव्येषु विशिष्टग्रन्थरत्नमिदं विवेका-नन्दचरितनामकं महाकाव्यम्। वस्तुतस्तु कविवरेण्यत्र्यम्बकलेखनीप्रसादात् समृद्धा सुर-भारती, भारतं च धन्यं जातम्। कविना साधूक्तम् —

धन्या वयं भारतमेव धन्यं यस्य प्रियो विश्वजिदात्मजोऽयम्। १४/८

× × ×

# 'दयानन्द-दिग्विजय'-वैशिष्ट्य-विवेचनम्

(श्रीमती शशि कुमार, एम. ए.)

सम्मान्याः अभिरूपशिरोमणयः। विदितचरमेवात्रभवतां यद् सकलासु विश्व-भाषासु श्रेष्ठत्वेन, सौष्ठवेन, परिपूर्णत्वेन, सारल्येन, माधुर्यादिना यथार्हंगुणगरिम्णा, सर्वोत्कृष्टत्वेन च या भाषा विलसतितरां सा तु देववाणी संस्कृतभाषैव। नूनं ते मानववर्याः अत्रास्माकं कोटिशः धन्यवादार्हाः यैः सत्स्वपि नैकेषु निघ्नेषु, भौतिकान् भोगांस्तिरस्कृत्येष दिव्यः शेवधिः सुरभारतीरूपः संरक्षितः, परिपाल्यते चाधुनापि। ईदृशेष्वेव प्रातःस्मरणीयेषु संस्कृतभाषायाः आधुनिकसमाराधकेष्वेको वर्त्तते महाकविः अखिलानन्दशर्म्मा महोदयः, येनास्मिन् कलिकालेऽपि यदा पाश्चात्यपदानुकारिणः केचन भारतीयाः विद्वांसोऽपि 'संस्कृतभाषा मृतेति' उद्घोषयन्ति, अस्यामेव भाषायां पञ्चविंशति ग्रन्थान् प्रणय्य संसेविता सुभूषिता चामरवाणी। वर्तमानशताब्द्यां विरचिते विरचय्यमाने च संस्कृतसाहित्योपवने महाकवेरस्य लेखनीलताप्रसूतं – 'दयानन्द-दिग्विजयम्' इति संज्ञकं, एकविंशतिसर्गबद्धं रुचिरं शिक्षाप्रदं महाकाव्यं खलु अप्रितमं कुसुमम्। महाकाव्येऽस्मिन् देवदेवस्य परोपकारव्रतस्य वेदवेदाङ्गज्ञातुर्जितेन्द्रियस्य महर्षिप्रवरस्य श्रीमद्दयानन्दस्वामिनः चरितं, समुपवर्णितम्। अतः निजनायकवन्महनीय-स्यास्य काव्यरत्नस्य सन्ति कानिचिदनितरसाधारणानि वैशिष्ट्यानि यानि सम्यक्तया विवेच्यानि सचेतसां चित्तावर्जनाय। एतदेव प्रयोजनजातं विमृश्य स्वल्पधिययापि मया यावद्बुद्धिबलोदयं परिश्राम्यन्त्याऽस्य महतो गीर्वाणवाणीभूषणस्य काव्यस्य परमभास्व-राणि माहात्म्यरत्नानि संकलितान्यत्र, तद्यथा —

१ पारम्परिकं महाकाव्यत्वम्—संस्कृतसाहित्यशास्त्राचार्यैः निर्दिष्टपरम्परानुसारं हि अस्मिन्काव्ये महाकाव्यानां निखिलानि लक्षणानि समीचीनतया चरितार्थतां गतान्यवलोक्यन्ते। यथा हि सर्गबन्धत्वम्, धीरशान्त 'सुर'-रूप नायकत्वम् ('विद्वांसो हि देवाः' इति शतपथप्रमाणाद्विद्वांस एव सुराः इति), भाषा-रामणीयकम्, भावगाम्भीर्यम्, छन्दसाम् औचित्यं, रसानां च सरसः परिपाकः — अस्मिन्ग्रन्थे परिपूर्णविषयतामवगाहते। 'शृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते' इति दर्पणकारवचनानुसारं क्षमावतो दयानन्दस्य चरितवर्णने शान्त एवाङ्गित्वे-नाङ्गीकृतोऽत्र। चित्रकाव्यरचनायामपि कविनानेनानन्यसाधारणं नैपुण्यं खल्वावि-ष्कृतम्। तदत्र चतुर्दशे सर्गे चित्ररचनं लभ्यते। पद्यमेकन्तु त्र्यक्षरमेव गुम्फ-

तम् :

'न ते न ते ते न ते न ते न ते तेन न ते न ते ।
न ते न ये ये न ते न ते ये न न ये न ते ॥ १४/१६०

२ साधुकाव्यत्वम्—'दयानन्ददिग्विजय' - कर्तुर्मतानुसारमद्यावधि संस्कृते वाल्मीकीयरामायणवर्जं यावन्त्यपि काव्यानि विरचितानि, तानि सर्वाण्येव न सन्ति वैदिकधर्मानुसारीण्यतः न सन्ति साधून्यपि — 'येषु काव्येषु धर्मवैचक्षण्यं मोक्षवैचक्षण्यं वा लेशमात्रमपि न प्राप्येत, तेषां साधुत्वमसाधुरेव कश्चिद्वदतु नाम ।' अतः काव्यस्यास्य सर्वप्रमुखं वैदिकधर्मसमुद्धारकं महर्षिरित्यभिधं परमलोकोपकारकं दयानन्दं नायकरूपे स्वीकरोति, सर्वथा च तत्प्रतिपादितवेदानुकूलराद्धान्तानेवानुसरतीति निश्चितमस्य साधुकाव्यत्वम् । तन्निदर्शनमपि किञ्चित् विदुषां मनोविनादायात्र पुरस्क्रियते —

'दिष्टं न वेदविषये ऋषिभिर्न सृष्टं
दृष्टं न धर्मसदनेष्वपि यत्कथं स्यात् ।
प्रामाण्यमस्य मनुजैः परिकल्पितस्य
श्राद्धस्य मन्दमतिमद्भिरलं कृतस्य ।' १०/५७

'यस्मिन्कृताध्नवन एष मनुष्यलोको –
देवे नियोजितमनाः प्रभवत्यलन्तत् ।
तीर्थं न तीर्थमिदमस्ति जलैः प्रपूर्णं
यन्मध्यजाः सुमतयो मरणं लभन्ते ।' १०/८२

पाषाणपूजाविरोधे उद्घोषयति ग्रन्थकारः —

'कुत्रेश्वरः सकलविश्वगतः क्व चेयं
तद्भावना लघुदृषच्छकले प्रवृत्ता ।' १०/१०१

× × ×

कुत्राश्मनिर्मितमुखादिमयी जडा सा
मूर्तिः क्व शक्ति महितो जगदेक नपिः । १०/१०४

३ भारत-वर्णनम्—महाकाव्यस्यास्य नाम्ना एव व्यज्यते यदिदं श्रीमतो दयानन्दस्य दिग्विजयं वर्णयति, अतएवात्र दयानन्द-दिग्विजय-माध्यमेन कविना भारतस्य अनुपमा सुषमा भव्या च सश्रीकता उपगुम्फिताऽदितोऽन्तम् । सकलतयाऽत्र भारतवर्षस्य नवति नगरीणां नामतः निर्देशः उल्लेखो वा विहितः तद्यथा काठिया-

वाङ्देशवर्णनम् अनुप्रासोल्लासपूर्णम् द्रष्टव्यमत्र —

'समस्तवस्तुविस्तारस्तुतिप्रस्तारभूषिता।
पृथिवीतलरत्नाभा या कृता परमेष्ठिना॥ २

× × ×

नानासस्यसमृद्धाभिरारामतरुपंक्तिभिः।
लसते परमा यत्र भूमिरप्यतिशोभना॥ २|४

'गाङ्गमम्बु बहु यत्र निर्मलं
तोयमध्यगतमिष्टकल्पनाम्। ५/४७

× × ×

'एकतः किल विभाति यत्र सा
पर्वतद्वयविचित्र-कल्पना।
रम्यभूमिरचनान्यतः परा
दृश्यते सहृदयैः कवीश्वरैः॥ ५/४५

अनेन नगरीवर्णनव्याजेन कविरस्य भारत देशविशेषस्य विशालत्वं विलक्षणत्वन्तु प्रकटयति एव, अप्रत्यक्षतोऽत्र राष्ट्रीयैक्यसन्देशमपि सम्यक्तया निदधाति।

४ सूक्तिमत्वम्—अनवद्येऽस्मिन् धर्मपरे महाकाव्ये धर्मानुचरस्य देशहितैषिणश्च कवेः सूक्तयोऽपि मनोहरतराः घटिताः, यास्तदनुभवकोषप्रपूर्णत्वं सुचारुतया प्रमाणीकुर्वन्ति, संस्कृतभाषायाः गहन-भाववत्त्वं च प्रदर्शयन्ति। तत्रापि रमणीयतमाः काश्चित् सूक्तयः सहृदयहृद्यात्यन्ताह्लादिकाः समुदाह्रियन्ते —

(१) मलिनता न दधाति गुणे पदम्। ३/१८
(२) न महतां क्व फलन्ति वाचः! ५/११
(३) न शुद्धिभाजो विरमन्त्यशुद्धिषु। ३/४३
(४) पापान्वितो भवति पापमना मनुष्यः। ६/४७
(५) सिध्यन्ति कुत्र सुकृतानि न पुण्यभाजाम्।
(६) अचिन्त्यगुणानामादरे भवति को न हितैषी। ६/२
(७) कुतो भवेन्न माता सुतपक्षपातिनी। ५/५
(८) न के जनाः सज्जनदर्शनोत्सुकाः। ११/१०६
(९) किमस्ति साध्यं न वशीकृतात्मनाम्। १३/२५
(१०) महोद्योगे कृतारम्भाः महान्तः कुत्र तन्वते।

विश्रामं यावदारब्धं न याति परिपूर्णताम् ॥ १४/२६६

५ शास्त्रार्थ-वर्णन-परत्वम्—समस्तशास्त्रावगाहिधिषणोऽयं धिषणोपमः महाकविः स्वरचनायां वैलक्षण्येन निजनायकस्य शास्त्रार्थमाध्यमेन सुतरां निजामपि तत्तच्छास्त्राभिज्ञतामाविष्करोतितराम्। मानवान् दुःखावसायिनो भोगविलासाद् विमुखीकृत्य तेषां त्यागतपःपरोपकृतिं प्रत्युन्मुखीकरणमेवास्य चरमोद्देश्यत्वेनावगम्यते। अतोऽस्य महाकाव्यस्य परिशीलनेन सुतरां कवेः सकलशास्त्रपारगामित्वमप्यवगतं भवति। काव्यशास्त्रस्य प्रावीण्यन्तु काव्यबन्धेऽस्मिन् सुव्यक्तमेव, यतः कविना सर्वथा तदनुकूला एव स्वकृतिः रचिता। वेदानां विषयवर्णने तेन निज वेदवित्त्वमपि सुप्रकटितम्, तद्यथा ऋग्विषयनिरूपणम्—

विलसति ऋगभिख्ये वेदमध्ये समस्ता
सकलगुणगणानां विस्तृतिर्लोकभाजाम्।
विमलकरणभाजां दर्शनादेव यस्याः
प्रभवति हृदि मन्ये देवदेवेऽनुरागः ॥ ८/५७

अन्यत्र शास्त्रार्थ-वर्णनेषु तेन पुराणपटुत्वम्, सामाजिकप्रथापरिचितत्वम्, दशमसर्गे तु नाट्यशास्त्रप्रावीण्यमपि व्यक्तमेव। दिग्विजय-वर्णनेन तस्य भूगोल-ज्ञानमपि प्रकाशमेति।

तदित्थं काव्यमिदं सर्वतोभावेन हृदयावर्जकं सम्पन्नम् महाकविना श्रीमदखिलानन्दशर्म्मणा चापि कुशलकलाकारेणेव महाकाव्येऽस्मिन्नखिलान्यपि उत्तमकाव्यवैशिष्ट्यानि, अनेकप्रकाराश्च संसारवृत्तयः विविधाश्च पाखण्डिनः सम्प्रदायाः, निरतिशयाश्चर्यचुम्बिताः घटनाः दयानन्दस्य जीवने लोकमंगलकारिणश्च तस्योपाया उपदेशाश्च काव्यव्याजेन प्रतिबिम्बिताः लोकचक्षुरुन्मीलनाय, संसार-मार्ग-प्रतिपत्तये, निवर्त्तितव्य-प्रवर्त्तितव्यपथप्रदर्शनाय चेति। अतस्तत्र को नाम प्रशंसार्हो विषयः योऽस्मिन्ग्रन्थे नोल्लसति।

नूनमद्भुता खलु कवेर्भारती, नितरां वाचामविषयीभूता च तस्य सुरभारतीसमाराधना, सर्वथाऽभिनन्दनीयं च भारत-गौरव-वर्णनम्। विस्तारभिया, तत्सर्वं विवेचनीयं समासेनैव विवेचितमत्र। अन्ते च, एषैवाभ्यर्थना सर्वेभ्यः गीर्वाणवाणिप्रणयिभ्यः यदियं भव्या, दिव्या प्रौढा चामरवाणी विश्वजनहिताय, सांस्कृतिकैक्यप्रतिष्ठापनाय, विश्वस्मिन् जगति चार्यसंस्कृतेः पुनः प्रसाराय — संस्कृतानुरागिभिर्भवादृशैः विद्वद्भिः भूयस्तरमुपबृंहणीया, अनुप्राणयितव्या चापि। उपसंहृतौ दयानन्द-

# विश्यां शताब्द्यां रचितानां संस्कृतमहाकाव्याना-मितिहासलेखनस्यावश्यकता

(डॉ० रमाकान्त शुक्लः)

विश्यां शताब्द्यामनेकानि महाकाव्यानि रचितानि सन्ति। कानिचित् विद्वद्भि-रवलोकितानि, कानिचित् समीक्षितानि, बहूनि नवत्वादवहेलितानि, अगणितानि च नाद्यावधि प्रेक्षितानि यतो हि तेषां प्रकाशनमेवाद्यावधि न संजातम्।

महाकाव्याभिधेषु ग्रन्थेषु केषांचनैव परिगणनात्मकोल्लेखः केषुचनैवेतिहास-ग्रन्थेषु संजातः। डॉ० श्रीधरभास्करवर्णेकरस्य महाराष्ट्रीभाषानिबद्धे "अर्वाचीन संस्कृत साहित्य" इति नामधेये अर्वाचीनसंस्कृतसाहित्येतिहासे षष्ट्युत्तरैकोनविंश-शततमेशवीयाब्दं यावत्प्रकाशितानामेव महाकाव्यानामुल्लेखोऽस्ति कृतः, डॉ० हीरालाल शुक्लेनाप्यत्यन्तं संक्षिप्ततया केषांचनैव महाकाव्यानामतिसंक्षिप्तः परिचयः स्वपुस्तके दत्तः।

षष्ट्युत्तरं रचितानां महाकाव्यनामधेयानां पुस्तकानां संख्या भूयसी विद्यते। यथा हि "सहस्रशो हि महात्मभिरलंकाराः रचिताः रच्यन्तेच" इति केनचिदुक्तमासी-त्तथैवाद्येदं कथयितुं पार्यते यद् बहुशो हि महाकविभिः संस्कृतमहाकाव्यानि विरचितानि विरच्यन्ते च। षष्ट्युत्तराणां केषांचन महाकाव्यानां नामपरिग्रहणमेव स्थानानुरोधा-दत्राऽस्माभिः क्रियते :—

१ ग्रन्थनाम : श्री तिलकयशोऽर्णवः (प्रथमखण्डः)
रचयिता : माधव श्री हरि अणे
प्रकाशकः : तिलकमहाराष्ट्रविद्यापीठं पुण्यपत्तनम्
प्रथमसंस्करणम् : १९६९,
द्वितीयखण्ड : १९७०
तृतीयखण्ड : १९७१

२ ग्रन्थनाम : लेनिनामृतम्
रचयिता : श्री पद्म शास्त्री
प्रकाशकम् : विश्वेश्वरानन्दवैदिकशोधसंस्थानम्
साधु आश्रम, होशियारपुर (पं०)
प्रथम संस्करणम् : १९७३

३ ग्रन्थनाम : श्रीनारायणविजयः
रचयिता : के० बालरामप्पणिक्करः
प्रथमसंस्करणम् : १९७१

४ ग्रन्थनाम : श्रीनेहरूचरितम्
रचयिता : श्री ब्रह्मानन्द शुक्लः
प्रकाशकम् : शारदा-सदनम्-खुरजा
प्रथमसंस्करणम् : १९६९

५ ग्रन्थनाम : श्री कृष्णाचरितामृतम्
रचयिता : कविरत्नश्रीकृष्णप्रसाद शर्मा, घिमिरे
प्रकाशकम् : श्रीकृष्णग्रन्थमाला–प्रकाशनम् १७/३४६ टंगाल गहिरी धारा काठमाण्डू (नैपाल)

६ ग्रन्थनाम : क्रिस्तुभागवतम्
रचयिता : पी० सी० देवस्य
प्रकाशकम् : जयभारतम् त्रिवेन्द्रम् १५ (केरल)
प्रथमसंस्करणम् : १९७७

७ ग्रन्थनाम : श्रीहरिसम्भवमहाकाव्यम्
रचयिता : कविसम्राट्चिन्त्यानन्दः
प्रकाशकम् : श्रीहरिप्रकाशशास्त्री, श्रीस्वामीनारायण मन्दिरम्, मच्छोदरी वाराणसी (उ० प्र०)
प्रथमसंस्करणम् : १९६८

८ ग्रन्थनाम : स्वराज्यविजयम्
रचयिता : श्रीद्विजेन्द्रनाथ विद्यामार्तण्डः
प्रकाशकम् : भारती-प्रतिष्ठानम्, मयराष्ट्रम् (मेरठ)
प्रथमसंस्करणम् : १९७१

९ ग्रन्थनाम : गणपतिसम्भवम्
रचयिता : म० म० वि० बा० पं० प्रभुदत्तशास्त्री
प्रकाशकम् : अर्चना प्रकाशनम्, ७६ रामदास पेंठ, नागपुर

दिल्ली कार्यालय: २/१७८६ स्टेट बैंक कॉलोनी, चांदनी
चौक, दिल्ली–६

प्रथमसंस्करणम् : १९६८

१० ग्रन्थनाम : सुरथचरितम्
रचयिता : पं० क्षेमधारीसिंहशर्मा
प्रकाशक: : बुद्धिधारीसिंह:, श्रीजयधारिसिंह प्रभाकर:, क्षेमधारि-
स्मृति-प्रकाशनम्, मधुबनी, दरभंगा
प्रथमसंस्करणम् : १९६७

११ ग्रन्थनाम : सीताचरितम्
रचयिता : डॉ० रेवा प्रसाद द्विवेदी
प्रकाशकम् : मनीषा प्रकाशनम्, डी ३५/३१० जंगमबाडी वाराणसी-२२१००१
प्रथमसंस्करणम् : १९७५

१२ ग्रन्थनाम : अद्भुतदूतम्
रचयिता : जग्गूवकुलभूषणकविः
प्रकाशक: : जग्गूवकुलभूषणम्, जग्गू आलवार अय्यंगार: २७२११
क्रॉस रोड, मल्लेश्वरम्

१३ ग्रन्थनाम : पूर्वभारतम्
रचयिता : श्रीप्रभुदत्तस्वामी
प्रकाशक: : ३ मानसरोवर मेरठ–२
प्रथमसंस्करणम् १९७४

१४ ग्रन्थनाम : विशालभारतम्
रचयिता प्रकाशकश्च : पं० श्यामवर्ण द्विवेदी
प्रधानाचार्य :, गोरक्षनाथसंस्कृतविद्यापीठम्, गोरखपुर
प्रथम संस्करणम् १९६९

१५ ग्रन्थनाम : श्री गोस्वामि तुलसीदासचरितम्
रचयिता : श्री पं० हरिप्रसाद द्विवेदी शास्त्री
प्रकाशक : आचार्य वेदव्रत शर्मा शास्त्री
मंत्री, भारतीय साहित्य संघः, कासगंज (उ०प्र०)

१६ ग्रन्थनाम : सुगमरामायणम्

रचयिता : डॉ० रमेशचन्द्र शुक्लः

प्रकाशिका : देववाणी-परिषद्, दिल्ली

६ वाणी विहारः, नई दिल्ली ११००५९

१७ ग्रन्थनाम : जवाहरज्योतिः

रचयिता पं० रघुनाथप्रसाद चतुर्वेदः

प्रकाशकश्च २ दशभुजी गणेश, मथुरा

प्रथम संस्करणम् : १९७७

एतेषु महाकाव्यनामधेयेषु ग्रन्थेषु चेत् कानिचिद्बृहत्पद्यसंकलनानि एव स्युः, केषुचिद् रूढेरेव गतानुगतिक पालनं चेद् भवेत्, केषुचिन्नावीन्यं न किंचिच्चेत् स्यात्, केषांचिद् रचनायाः मूले लोभो भयं वा निहितं प्रतीयेत तथापि कानिचिन्महाकाव्यानि एतादृशान्यपि लब्धानि स्युः यत्र हि महाकवेः साधना प्रस्फुटिता दृश्येत्, यत्र च महदुद्देश्य महत्प्रेरणा—महानायकादीनां स्पष्टमाभासोऽनुभूयेत ।

एतेषां संकलनम् अवलोकनम्, आलोचनम्, परीक्षणं, संरक्षणं, प्रकाशनम् चावश्यकम् । कानिचित्काव्यानि त्वेवं हृद्यानि सन्ति यत्तत्र मनः सहजतया रमते; येषु च क्वचित् कान्तासम्मितोपदेशः, क्वचिद्वर्णनविच्छित्तिः, क्वचिन्महापुरुषकीर्तनेन चारुविश्वनिर्माणेच्छा, क्वचिच्च नवनवा अभिव्यंजनशैली पाठकस्य चेतः प्रसभं हरन्ति । प्रकाशितानि तु महाकाव्यानि यथाकथंचिदुपलब्धानि स्युः किन्तु अप्रकाशितानां कथमुपलब्धिः स्यादित्यत्रापि विचारणीयं विद्यते ।

—:०:—

दिग्विजयकर्त्रा सहैव वयमप्येतदेव प्रार्थयामहे, यत्—

'दुर्दशां दुर्दशा यातु सुदशां यातु भारतम् ।'

०—०

KENDRIYA SANSKRIT VIDYA PEETHAM LIBRARY, TIRUPATI
24875
015,1x:g
N79
VERIFIED-2001
CATALOGUED

VERIFIED 1985
VERIFIED 1989
CATALOGUED.

देववाणी-परिषद्, दिल्ली

दिव्यं तत्संस्कृतज्योतिरासंसार प्रकाशताम्

वि० २०३३ स्थापनाब्दः १९७६ ई०

मूल्यम् : १५-००

Price Rs. 15-00